# संस्कृत-पाठचयनम्

(For the 1st & 2nd year Higher Secondary Classes)

**सम्पादितम्**

**असम उच्चतर माध्यमिक शिक्षा संसदा**

**प्रकाशकः**

असम उच्चतर माध्यमिक शिक्षा संसदः

प्रतिनिधित्बेन

मणि माणिक प्रकाशः गुवाहाटी-1

Sanskrita Pathchayanam : A textbook on Sanskrit Prose and Poetry compiled and prescribed by the Assam Higher Secondary Education Council, for the two year Higher Secondary Course and published by Mani Manik Prakash, Panbazar, Guwahati- 781001, on behalf of the Assam Higher Secondary Education Council, First edition : 2005

**प्रकाशकः**

असम उच्चतर माध्यमिक शिक्षा संसद : प्रतिनिधित्वेन

मणि माणिक प्रकाश : गुवाहाटी- 1

**सम्पादनासमिति :**

ड° राजेन्द्रनाथ शर्मा

ड° सुधेन्दुमोहन भद्रः

श्रीहरमोहन देव गोस्वामी

श्रीगोकुलेन्द्र नारायण देव गोस्वामी।

1st Edition : 2005
11th Edition : 2019
12th Edition : 2020
13th Edition : 2021
14th Edition (Reprint) : 2022

Price : ₹ 55.00/-

© असम उच्चतर माध्यमिक शिक्षा संसद्

Printed At :
CHITRACHAL PRINTERS
G.N.B. Road, Silpukhuri, Guwahati-3

# Preface

The Assam Higher Secondary Education council has introduced a revised curriculum (scheme of studies from 2005-2006 academic session. The revision has been done on the basis of National Curriculum Framework as proposed by N.C.E.R.T.

Study of Sanskrit as an elective classical subject under the revised curriculum emphasises adequate development of language ability of the students to handle the language confidently in speech and writing in diverse situations.

The book "Sanskrita Pathachayanam" is prepared to meet this objective. The focus of the book, being giving on developing students' communicative competence, one would note that in the excrcises there is a conscious effort to acquaint the students with the operation of vocabulary and structure in the language.

The council thanks the members of the Editorial Board for compiling, editing the annotating the pieces included in this compilation.

Secretary

THE CONSTITUTION OF INDIA

Article 51 A

Fundamental Duties- It shall be the duty of every citizen of India.

a to abide by the Constitution and respect its ideals and institutions, the National Flag and the National Anthem;

b to cherish and follow the noble ideals which inspired our national struggle for freedom;

c to uphold and protect the sovereignty, unity and integrity of India;

d to defend the country and render national service when called upon to do so;

e to promote harmony and the spirit of common brother-hood amongst all the people of India transcending religious, linguistic and regional or sectional diversities; to renounce practices derogatory to the dignity of women;

f to value and preserve the rich heritage of our composite culture;

g to protect and improve the natural environment including forest, lakes, rivers, wild life and to have compassion for living creatures;

h to develop the scientific temper, humanism and the spirit of inquiry and reform;

i to safeguard public property and to abjure violence;

j to strive towards excellence in all spheres of individual and collective activity so that the nation constantly rises to higher levels of endeavour and achievement.

# सूचीपत्रम्
## (एकादशश्रेणीकृते)

**कविता खण्डः**


| विषयः | लेखकः | पृष्ठा |
|---|---|---|
| भट्टिकाव्यम् (द्वितीयः सर्गः) | भट्टिः | 1 |
| जयमतीकाव्यम् (१६ श्लोकाः) | भवदेव भागवती | 21 |


**कथा खण्डः**


| | | |
|---|---|---|
| असमीया संस्कृतिः | ड० अशोक कुमार गोस्वामी | 31 |
| प्रदूषणसमस्या | ड० अपूर्व चन्द्र बरठाकुरीया | 37 |


# सूचीपत्रम्
## (द्वादशश्रेणीकृते)

**कविता खण्डः**


| विषयः | लेखकः | पृष्ठा |
|---|---|---|
| रघुवंशम् (त्रयोदशः सर्गः) | कालिदासः | 43 |
| श्रीमद्भगवद्गीता (द्वितीयः अध्यायः) | | 78 |


**कथा खण्डः**


| | | |
|---|---|---|
| नागानन्दे (शरीरं क्षणविध्वंसि कल्पान्त स्थायिनो गुणाः) | हर्षवर्द्धनः | 89 |
| असम राज्ये संस्कृत चर्चा | ड० राजेन्द्रनाथ शर्मा | 103 |

# संस्कृत-पाठचयनम्

(एकादशश्रेणीकृते)

१

श्री भट्टिविरचिते

# भट्टिकाव्ये

## द्वितीयः सर्गः

## सीतापरिणयः

## (शरद्वर्णनम्)

वनस्पतीनां सरसां नदीनां तेजस्विनां कान्तिभृतां दिशाञ्च।
निर्याय तस्याः स पुरः समन्ताच्छ्रियं दधानां शरदं ददर्श॥ १॥

तरंगसंगाच्चपलैः पलाशैर्ज्वालाश्रियं सातिशयां दधन्ति।
सधूमदीप्ताग्निरुचिनि रेजुस्ताम्रोत्पलान्याकुलषट्पदानि॥ २॥

बिम्बागतैस्तीरवनैः समृद्धिं निजां विलोक्यापहृतां पयोभिः।
कूलानि सामर्षतयेव तेनुः[1] सरोजलक्ष्मीं स्थलपद्महासैः॥ ३॥

निशातुषारैर्नयनाम्बुकल्पैः पत्रान्तपर्यागलदच्छविन्दुः[2]।
उपारुरोदेव नदत्पतङ्गः कुमुद्वतीं तीरतरुर्दिनादौ॥ ४॥

१। 'सामर्षतया वितेनुः' इति मल्लिनाथसमर्थितः पाठो हेयः।
२। 'अश्रुविन्दु- रिति मल्लिनाथसमर्थितपाठस्तु न ग्राह्यः।'



बनानि तोयानि च नेत्रकल्पैः पुष्पैः सरोजैश्च निलीनभृङ्गै।
परस्परां विस्मयवन्ति लक्ष्मीमालोकयाञ्चक्रुरिवादरेण॥ ५॥

प्रभातवाताहतिकम्पिताकृतिः कुमुद्वतीरेणुपिशङ्गविग्रहम्।
निरास भङ्गं कुपितेव पद्मिनी न मानिनीशं सहतेऽन्यसङ्गमम्॥ ६॥

दत्तवधानं मधुलेहिगीतौ प्रशान्तचेष्टं हरिणं जिघांसुः।
आकर्णयन्नुत्सुकहंसनादान् लक्ष्ये समाधिं न दधे मृगावित्॥ ७॥

गिरेर्नितम्बे मरुता विभिन्नं तोयावशेषेण हिमाभमभ्रम्।
सरिन्मुखाभ्युच्चयमादधानं शैलाधिपस्यानुचकार लक्ष्मीम्॥ ८॥

गर्जन् हरिः साम्भसि शैलकुञ्जे प्रतिध्वनीनात्मकृतान् निशम्य।
क्रमं बबन्ध क्रमितुं सकोपः प्रतर्कयन्नन्यमृगेन्द्रनादान्॥ ९॥

अदृक्षताम्भांसि नवोत्पलानि रुतानि चाश्रोषत षट्पदानाम्।
आघ्रायि वान् गन्धवहः सुगन्धस्तेनारविन्दव्यतिषङ्गवांश्च॥ १०॥

लतानुपातं कुसुमान्यगृह्णात् स नद्यवस्कन्दमुपास्पृशच्च।
कुतूहलाच्चारुशिलोपवेशं काकुत्स्थ ईषत् स्मयमान आस्त॥ ११॥

तिग्मांशुरश्मिच्छुरितान्यदूरात् प्राञ्चि प्रभाते सलिलान्यपश्यत्।
गभस्तिधाराभिरिव द्रुतानि तेजांसि भानोर्भुवि सम्भृतानि॥ १२॥

दिग्व्यापिनीर्लोचनलोभनीया मृजान्वयाः स्नेहमिव स्रवन्तीः।
ऋज्वायताः शस्यविशेषपङ्क्तीस्तुतोष पश्यन् वितृणान्तरालसः॥ १३॥

वियोगदुःखानुभवानभिज्ञैः काले नृपांशं विहितं ददद्भिः।
आहार्यशोभारहितैरमायैरैक्षिष्ट पुम्भिः प्रचितान् स गोष्ठान्॥ १४॥

स्त्रीभूषणं चेष्टितमप्रगल्भं चारुण्यवक्राण्यपि बीक्षितानि।
ऋजूंश्च विश्वासकृतः स्वभावान् गोपाङ्गनानां मुमुदे विलोक्य॥ १५॥

विवृत्त पार्श्वं रुचिराङ्गहारं समुद्वहच्चारुनितम्बरम्यम्।
आमन्द्रमन्थध्वनिदत्ततालं गोपाङ्गनानृत्यमनन्दयत् तम्॥ १६॥

विचित्रमुच्चैः प्लवमानमारात् कुतूहलं त्रस्नु ततान तस्य।
मेघात्ययोपात्तवनोपशोभं कदम्बकं वातमजं मृगाणाम्॥ १७॥

सितारविन्दप्रचयेषु लीनाः संसक्तफेनेषु च सैकतेषु।
कुन्दावदाताः कलहंसमालाः प्रतीयिरे श्रोत्रसुखैर्निनादैः॥ १८॥

न तज्जलं यन्न सुचारुपङ्कजं न पङ्कजं तद् यदलीनषट्पदम्।
न षट्पदोऽसौ न जुगुञ्ज यः कलं न गुञ्जितं तन्न जहार यन्मनः॥ १९॥

## (तपोवनवासिभिः कृतं श्रीरामस्यार्चनम्)

तं यायजूकाः सह भिक्षुमुख्यैस्तपः कृशाः शान्त्युदकुम्भहस्ताः।
यायावराः पुष्पफलेन चान्ये प्राणर्चुरर्च्या जगदर्चनीयम्॥ २०॥

## (श्रीरामस्य शस्त्रविद्यालाभः)

विद्यामथैनं विजयां जयाञ्च रक्षोगणं क्षिप्नुमविक्षतात्मा।
अध्यापिपद् गाधिसुतो यथावन्निघातयिष्यन् युधि यातुधानान्॥ २१॥



आयोधने स्थायुकमस्त्रजातममोघमभ्यर्णमहाहवाय।
ददौ वधाय क्षणदाचराणां तस्मै मुनिः श्रेयसि जागरुकः॥ २२॥

## (ताडकावधः)

तं विप्रदर्शं कृतघातयत्ना यान्तं वने रात्रिचरी डुढौके।
जिघांसुवेदं धृतभासुरास्त्रस्तां ताडकाख्यां निजघान रामः॥ २३॥

## (आश्रमप्राप्तिः)

अथालुलोके हुतधूमकेतुशिखाञ्जनस्निग्धसमृद्धशाखम्।
तपोवनं प्राध्ययनाभिभूतसमुच्चरच्चारुपतत्रिशिञ्जम्॥ २४॥

क्षुद्रान् न जक्षुर्हरिणान् मृगेन्द्रा विशश्वसे पक्षिगणैः समन्तात्।
नन्नम्यमानाः फलदित्सयेव चकाशिरे तत्र लता विलोलाः॥ २५॥

अपुपूजन् विष्टरपाद्यमाल्यैरातिथ्यनिष्णा वनवासिमुख्याः।
प्रत्यग्रहीष्टां मधुपर्कमिश्रं तावासनादि क्षितिपालपुत्रौ॥ २६॥

दैत्याभिभूतस्य युवामवोढं मग्नस्य दोर्भिर्भुवनस्य भारम्।
हवींषि सम्प्रत्यपि रक्षतं तौ तपोधनैरित्थमभाषिषाताम्॥ २७॥

तान् प्रत्यवादीदथ राधवोऽपि यथेप्सितं प्रस्तुत कर्म धर्म्यम्।
तपोमरुद्भिर्भवतां शाराग्निः सन्धुक्ष्यतां नोऽरिसमिन्धनेषु॥ २८॥

## (यातुधानैः संघर्षः)

प्रतुष्टुवुः कर्म ततः प्रक्लृप्तैस्ते यज्ञियैर्द्रव्यगणैर्यथावत्॥
दाक्षिण्यदिष्टं कृतमार्त्विजीनैस्तद् यातुधानैश्चिचिते प्रसर्पत्॥ २९॥

आपिङ्गरुक्षोर्ध्वशिरस्यवालैः शिरालजङ्घैर्गिरिकूटदध्नैः।
ततः क्षपाटैः पृथुपिङ्गलाक्षैः खं प्रावृषेण्यैरिव चानशेऽब्दैः॥ ३०॥

अधिज्यचापः स्थिरबाहुमुष्टि-रुदञ्चिताक्षोऽञ्चितदक्षिणोरुः।
तॉल्लक्ष्मणः सन्नतवामजङ्घो जघान शुद्धेषुरमन्दकर्षी॥ ३१॥

## (राममारीचसंलापः)

गाधेयदिष्टं विरसं रसन्तं रामोऽपि मायाचणमस्त्रचुञ्चुः।
स्थास्नुं रणे स्मेरमुखो जगाद मारीचमुच्चैर्वचनं महार्थम्॥ ३२॥

आत्मम्भरिस्त्वं पिशितैर्नराणां फलेग्रहीन् हंसि वनस्पतीनाम्।
शौवस्तिकत्वं विभवा न येषां व्रजन्ति तेषां दयसे न कस्मात्॥ ३३॥

अद्मो द्विजान् देवयजीन् निहन्मः कुर्मः पुरं प्रेतनराधिवासम्।
धर्मो ह्ययं दाशरथे निजो नो नैवाध्यकारिष्महि वेदवृत्ते॥ ३४॥

धर्मोऽस्ति सत्यं तव राक्षसोऽयमन्यो व्यतिस्ते तु ममापि धर्मः।
ब्रह्मद्विषस्ते प्रणिहन्मि येन राजन्यवृत्तिर्धृतकार्मुकेषु॥ ३५॥

इत्थम्प्रवादं युधि सम्प्रहारं प्रचक्रतू रामनिशाविहारौ।
तृणाय मत्वा रघुनन्दनोऽथ वाणेन रक्षः प्रधनान्निरास्थत्॥ ३६॥



## (मुनीनाम् श्रीरामप्रशंसा)

जग्मुः प्रसादं द्विजमानसानि द्यौर्वर्षुका पुष्पचयं बभूव।
निर्व्याजमिज्या ववृते वचश्च भूयो बभाषे मुनिना कुमारः॥ २७॥

महीय्यमाना भवतातिमात्रं सुराध्वरे घस्मरजित्वरेण।
दिवोऽपि बज्रायुधभूषणाया हृणीयते वीरवती न भूमिः॥ ३८॥

बलिर्बबन्धे जलधिर्ममन्थे जह्रेऽमृतं दैत्यकुलं विजिग्ये।
कल्पान्तदुःस्था वसुधा तथोहे येनैष भारोऽतिगुरुर्न तस्य॥ ३९॥

## (मिथिलावृत्तान्तः)

इति ब्रुवाणो मधुरं हितञ्च तमाज्जिहन्मैथिलयज्ञभूमिम्।
रामं मुनिः प्रीतमना मखान्ते यशांसि राज्ञां निजिघृक्षयिष्यन्॥ ४०॥

[३] हतः स्म मित्रावरुणौ किमेतौ किमश्विनौ सोमरसं पिपासू।
जनं समस्तं जनकाश्रमस्थं रूपेण तावौजिहतां नृसिंहौ॥ ४१॥

अजिग्रहत्तं जनको धनुस्तद् येनार्दिदद् दैत्यपुरं पिनाकी।
जिज्ञासमानो बलमस्य बाह्वोर्हसन्नभांङ्क्षीद् रघुनन्दनस्तत्॥ ४२॥

ततो नदीष्णान् पथिकान् गिरिज्ञानाह्वायकान् भूमिपतेरयोध्याम्।
दित्सुः सुतां योधहरैस्तुरङ्गैर्व्यसर्जयन्मैथिलमर्त्यमुख्यः॥ ४३॥

क्षिप्रं ततोऽध्वन्यतुरङ्गयायी यविष्ठवद् वृद्धतमोऽपि राजा।
आख्यायकेभ्यः श्रुतसूनुवृत्तिरग्लानयानो मिथिलामगच्छत्॥ ४४॥

---

३. एतौ स्म इति पाठान्तरमपि ग्राह्यम्।

वृन्दिष्ठमार्चीद् वसुधाधिपानां तं प्रेष्ठमेतं गुरुवद् गरिष्ठम्।
सद्गृङ् महान्तं सुकृताधिवासं बर्हिष्ठकीर्तिर्यशसा वरिष्ठम्॥ ४५॥

त्रिवर्गपारीणमसौ भवन्तमध्यासयन्नासनमेकमिन्द्रः।
विवेकदृश्वत्वमगात् सुराणां तं मैथिलो वाक्यमिदं बभाषे॥ ४६॥

हिरण्मयी साललतेव जङ्गमा च्युता दिवः स्थास्नुरिवाचिरप्रभा।
शशाङ्ककान्तेरधिदेवताकृतिः सुता ददे तस्य सुताय मैथिली॥ ४७॥

लब्ध्वां ततो विश्वजनीनवृत्तिस्तामात्मनीनामुदवोढ रामः।
सद्रत्नमुक्तफलभर्मभूषां संवहयन्तीं रघुवर्ग्यलक्ष्मीम्॥ ४८॥

सुप्रातमासमदितसम्मदं तद् वन्दारुभिः संस्तुतमभ्ययोध्यम्।
अश्वीयराजन्यकहास्तिकाढ्यमगात् सराजं बलमध्वनीनाम्॥ ४९॥

**(श्रीरामजामदग्न्यसंघर्षः)**

विशङ्कटो वक्षसि बाणपाणिः सम्पन्नतालद्वयसः पुरस्तात्।
भीष्मो धनुष्मानुपजान्वरत्निरैति स्म रामः पथि जामदग्न्यः॥ ५०॥

उच्चैरसौ राघवमाहवतेदं धनुः सबाणं कुरु मातियासीः।
पराक्रमज्ञः प्रियसन्ततिस्तं नम्रः क्षितीन्द्रोऽनुनिनीषुरुचे॥ ५१॥

अनेकशो निर्जितराजकस्त्वं पितृनतार्प्सीर्नृपरक्ततोयैः।
संक्षिप्य संरम्भमसद्विपक्षं कास्थार्भकेऽस्मिंस्तव राम रामे॥ ५२॥

अजीगणद्दशरथं न वाक्यं यदा स दर्पेण तदा कुमारः।
धनुर्व्यकार्क्षीद् गुरुबाणगर्भं लोकानलावीद् विजितांश्च तस्य॥ ५३॥



जिते नृपारौ सुमनीभवन्ति शब्दायमानान्यशनैरशङ्कम्।
वृद्धस्य राज्ञोऽनुमते बलानि जगाहिरेऽनेकमुखानि मार्गान्॥ ५४॥

अथ पुरुजवयोगात्रेदयद् दूरसंस्थं
दवयदतिरयेण प्राप्तमूर्वी विभागम्।
क्लमरहितमचेतत्रीरजीकारितक्ष्मां
बलमुपहितशोभां तूर्णमायादयोध्याम्॥ ५५॥

॥ इति श्रीभट्टिकाव्ये प्रकीर्णकाण्डे सीतापरिणयो नाम द्वितीयः सर्गः॥

1 1 1 1

# Bhattikavya

## Canto.II

# भट्टिकाव्ये

## सीतापरिणयः (द्वितीयः सर्गः)

## Introduction :

The Bhattikavya, otherwise known as Ravanavadha, is a grammatical poem in twenty two cantos, composed by the poet Bhatti with the object of illustrating Panini's sutras. It is divided into four sections :-

(1) Prakirna-Kanda – Miscellaneous section-cantos 1-V.

(2) Adhikara Kanda – Illustrating head rules-cantos VI-IX.

(3) Prasanna Kanda – Illustrating a portion of the poetics cantos X-XIII.

(4) Tiñanta Kanda – Illustrating tenses and moods cantos XIV-XXII.

There is a interesting story about the composition of the work. One day, while the poet was teaching grammar to his students, an elephant passed between the teacher and the taught. It meant, according to the sastras, the cessation of Vedic study (anadhyaya) for one year.Vyakarana, being a Vedanga, its study was also prohibited. But as there was no such prohibition for



the study of Kavya, Bhatti did not sit idle, but hit upon the device of teaching grammar through the medium of literature. The result of this digression was the Poem Bhattikavya.

## Notes :

Sl. 1.

**वनस्पतीनां–** वनस्य पतिः (वनः + पति) वनस्पति (षष्ठीतत्, तेषाम्; स (सुट्) comes in irregularly (निपातन), belongs to the पारस्कर class and denote a name (संज्ञा) "पारस्करप्रभृतीनि च संज्ञायाम्।"

**तेजस्विनाम्–** तेजस् + विनि मत्वर्थे प्रशंसायाम्– "अस् मायामेधास्रजो विनिः।" शेषे षष्ठी।

**कान्तिभृताम्–** कम् + क्तिन् भावे, कान्तिः– शोभा। कान्तिं बिभ्रति इति कान्ति-भृ + प् कर्त्तरि उपपदसमासे।

**दधानां–** धा + लटः स्थाने शानच् कर्त्तरि + स्त्रियां टाप्।

**ददर्श–** दृश् + लिट् अ (आ)।

Sl. 2.

**तरङ्गसङ्गात्–** तरङ्गाणां सङ्ग (६ ष्ठी तत्) अथवा तरङ्गैः सङ्ग (३ या तत्), तस्मात्हेतौ ५मी। These 'तरङ्ग's were mere ripples caused by the gentle morning breeze of autumn and not big billows, for that would clash with the idea of verse 3. A rough surface would not reflect the trees on the bank- "भङ्गस्तरङ्ग उर्म्मिर्वा स्त्रियां वीचि"– अमरः।

**सातिशयां–** अतिशयेन सह वर्त्तमानं तद् यथा तथा (बहु) Adv.to क्रियां दधन्ति। अतिशयेन सह वर्तमाना, ताम्।

**दधन्ति–** धा + लट्स्थाने शतृ + क्लीं १मा बहुव, adj. to ताम्रोत्-पलानि।

**रेजुः–** राज् + लिट् उस्।

Sl. 3.

**विम्वागतैः –** विम्वेन (प्रतिविम्वरूपेण) आगतानि (३या तत्)– "कर्तृकरणे कृता बहुलम्"।

**समृद्धिम्–** सम्-ऋध् + क्तिन्, adj. to विलोक्य। समृद्धि here means richness, i.e. beauty.

**तेनुः –** तन् + लिट् उस्।

**सरोजलक्ष्मीम्–** adj.to तेनुः। सरसि जायन्ते (उपपदतत्) इति सरोजानि (lotus); तेषां लक्ष्मीः (६ष्ठी तत्), ताम्। सरस्- जन् + ड = सरोज।

The form सरसिज also is available by the rule "तत्पुरुषे कृति बहुलम्॥" In the above expression सरोज also may be taken in its etymological sense when it is used as adj. to लक्ष्मी and means 'arising from the pond.' सरोजा (सरसः जाताः लक्ष्मीः (कर्मधा), ताम्।

Sl. 4.

**निशातुषारैः –** With the dews of night. निशायाः तुषाराः (६ ष्ठी तत्) तैः, or निशायां गलिताः तुषाराः (शाकपार्थिवादिवत् समासः), तैः।

**उपारुरोद-** उप-आ-रुद् + लिट् अ।

**नदत्पतङ्ग-** Adj to तीरतरुः, नदन्तः पतङ्गाः यस्मिन् (बहु), सः पतङ्ग also means insects. Birds chirped and the poet imagines that the tree was weeping loudly.नदत्- Chirping. पतङ्गः- bird.



**दिनादौ-** कालाधिकरणे ७मी।

Sl. 5.

**आलोकयाञ्चक्रुः –** आ-लोकि (स्वार्थे णिच्) (-चुरादि) + लिट् उस्।

Sl. 6.

**मानिनी –** A jealous lady.

**अन्यसङ्गमम्–** Adj. to ईशम्। अन्यः सङ्गमः यस्य (बहु), तम्। सम्- गम् + अप् = सङ्गमः, union, dalliance.

Sl. 7.

**दत्तावधानम्–** Adj. to हरिणम्। दत्तम् अवधानं येन (बहु), तम्। अवधानम्– attention.

**समाधिं–** Attention of mind. सम्-आ-धा + by the rule "उपसर्गे धोः किः।"

**मृगावित्–** Deer- Piercing or animal- killing hunter.

Sl. 8.

**नितम्वे–** In the waist, middle part, the blank of a mountain.

अनुचकार- अनु + कृ + लिट् अ।

Sl. 9.

**शैलकुञ्चे-** आधारे ७मी। शैलस्य कुञ्जम् (६ ष्ठी तत्), तस्मिन्। This signifies the solitariness of the place fit for being hunted by lions.

**निशम्य-** Hearing. नि-शम् + ल्यप्।

**बबन्ध-** बन्ध + लिट् अ।

**क्रमितुम्-** To spring. क्रम् + तुमुन्।

**सकोपः-** Adj. to हरिः, कोपेन सह वर्तमानः (तुल्ययोगे बहु.)।

**प्रतर्कयन्-** Mistaking, doubting.

Sl. 10.

**नवोत्पलानि-** Adj. to अम्भांसि, नवानि उत्पलानि येषु (बहु.), तानि।

**आघ्रायि-** आ-घ्रा + कर्मणि लुङ् त।

**सुगन्धः-** शोभनः गन्धः यस्य (बहु.), सः।

Sl. 11

**नद्यवस्कन्दम्-** अव्यय। Going down into every river.

**उपास्पृशत-** उप-स्पृश् + लङ् द।

**चारुशिलोपवेशम्-** अव्यय; चारुः शिला (कर्मधा); चारुशिला; चारुशिलाम् उपविश्य (व्याप्ति); or चारुशिलाम् उपविश्य- Sitting on every quaint slab of stone.

**काकुतस्थः-** Refers to Rama, ककुत्स्थस्य अपत्यं पुमान् इति ककुत्स्थ + अण्। the name of a king of the solar dynasty.

Allusion- There was a valiant king named Puranjaya, in the solar race. Once, gods approached him and requested him to inflict a crushing defeat on demons who had been causing untold sufferings to them. Puranjaya agreed to the proposal on condition that during his fight with the demons, he (Puranjaya) would sit on the shoulders of Indra who agreed and assumed the form of a bull. Puranjaya, sitting on the hump (ककुद्) of the bull, defeated the demons. Hence, that king was known as Kākutstha and his descendants as Kākutstha. So, Rama is also called काकुत्स्थ।

Sl. 13.

**ऋज्वायताः -** Adj. to- पङ्क्तीः ; ऋजवश्च आयताश्च (कर्मधा). Adj. to- पङ्क्तीः; When two adjectives are compounded, one of them preferably the latter



one, is taken as a noun and then the कर्म्मधा compound is made out. ऋजु means straight. आ-यम् + क्त = आयत। The clump of corn, on account of weeds having been footed out, became straight and long due to proper nourishment.

**तुतोष-** तुष् + लिट् अ।

Sl. 14.

**नृपांशम्-** Obj. to ददद्भिः। नृपस्य अंश (६ ष्ठीतत्), तम्। नृपांश means 'dues to the king' which consisted generally of the sixth part of the produce of the land.

Sl. 15.

**मुमुदे-** मुद् + लिट् ए।

Sl. 16.

**विवृत्तपार्श्वम्-** Adj. to गोपाङ्गनानृत्तम्। विवृन्ते पार्श्वं यत्र (बहुव्री.) तत्। पार्श्व means the part of the body below the armpit.

**आरात्-** अव्यय, which means both दूर and समीप। Here it means समीप, as the deer got frightened to see Rama at close quarters.

Sl. 17.

**वातजम्-** Adj. to कदम्वकम्; वातं वायुम् अजति (गच्छति) इति वात-अज् + खश्। वातजम् is a kind of deer running in the direction of the wind.

Sl. 18.

**प्रतीयिरे-** प्रति-इ + लिट् कर्म्मणि इरे।

**निनादः-** नि + नद् + घञ्।

Sl. 19.

**युगुञ्ज-** गुञ्ज् + लिट् अ।
**जहार-** हृ + लिट् अ।

Sl. 20.

**यायजूकाः -** a class of mendicants who are always engaged in performing sacrifices according to Vedic injunctions.

**यायावराः -** A class of house-holders who earned their livelihood with शिल (gleaning of ears of corn) and उञ्च (gleaning grains of corn).

Sl. 21.

**विजयाम् जयां-** These are two spells taught by Viśvāmitra to Rama. They were named वला and अतिवला in the Ramayana.

**गाधिसुतः -** Gadhi was the name of the father of Viśvāmitra and was the king of Kauśāmba and was regarded as the incarnation of Indra.

Sl. 23.

**रात्रिचरः -** is used in the sense of राक्षसः।

Sl. 25.

**विशश्वसे-** वि-श्वस् + भावे लिट् ए।

**नंनम्यमानाः -** adj. to लताः, अतिशयेन नमन्त्यः इति नम्-यङ् + शानच्।

**चकाशिरे-** काश् + लिट् इरे।

Sl. 26.

**अपुपूजन्-** पूज् (पूजि) + लुङ् द।
**विष्टरपाद्यमाल्यैः -** विष्टराणि च पाद्यानि च माल्यानि च (द्वन्द्व) तैः।



**वनवासिमुख्या-** वने वसन्ति ये ते (उपपदतत्) वन-वस् + णिनि ताच्छील्ये = वनवासिन्, तेषां मुख्याः (६ष्ठी तत्), वनवासिन् here means anchorites (वानप्रस्थिन् or वैखानस्) 'वैखानसो, वनवासी वानप्रस्थश्च तापसः'— यादवः।

Sl. 29.

**यज्ञियैः -** Adj. to द्रव्यगणैः, यज्ञकर्म्म अर्हन्तीति यज्ञर्तिग्भ्यां तत्कम्मार्हतीत्युपसंख्यानम् by which यज्ञिय 'materials requisite for sacrifice'. But यज्ञिय obtained by the rule "यज्ञर्त्विग्भ्यां घखञौ" means a Brahmana capable of performing sacrifices.

Sl. 31.

**उदञ्चिताक्षः -** Adj. to लक्ष्मणः; उदञ्चिते अक्षिणी यस्य (बहु); सः।

Sl. 33.

**आत्मम्भरि-** Obj. to त्वम्; आत्मानं बिभर्त्ति इति उपपदसमासे आत्मन् + भृ + इन्।

**शौवस्तिकत्वम्-** Obj. to व्रजन्ति; श्वः = आगामी कल्प। श्वो भवः इति श्वस् + ठञ्-तुट् च; 'श्वस्स्तुट् च" = शौवस्तिकम्; तस्य भावः इति शौवस्तिक + त्व = शैवस्तिकत्वम्।

Sl. 34.

**देवयजीन्-** Obj. to निहन्मः; देवान् यजन्ति ये ते इति उपपदसमासे देव-यज् + इन् (इ) 'सार्वधातुभ्य इन्" ऊणादि)।

Sl. 35.

**व्यतिस्ते-** वि-अति-अस् + लट् ते Nom. धर्मः। It literally means- "But this other duty of mine (i.e. chastising wrong-doers) is in exchange for your action of slaughter which you consider your duty." (Trivedi).

Sl. 36.

**प्रचक्रतुः-** प्र-कृ + लिट् अतुस्। रामनिशाविहारौ- Nom. रामश्च निशाविहारश्च (द्वन्द्वः) तौ; निशायां विहारः यस्य (व्यधिकरण बहु); सः। वि-हृ + घञ् = विहारः।

Sl. 37.

**जग्मुः-** गम् + लिट् उस्।

**प्रसादम्-** प्र-सद् + घञ्।

**द्विजमानसानि-** Nom. द्विजानां मानसानि (६ष्ठी तत्); मनः एव इति मनस् + अण् स्वार्थे प्रज्ञादित्वात् = मानसम्।

**ववृते-** वृत् + लिट् ए।

Sl. 38.

**भवता-** अनुक्ते कर्तरि ३या in relation to महीय्यमाना।

**अतिमात्रम्-** क्रि-विण; अतिगता मात्रा यस्मिन् यथा स्यात् तथा (बहु)।

Sl. 39.

Allusion - The sages, in course of their eulogising Rama, referred to his various exploits to save the creation from various perils in his previous incarnations.

**बलिर्बवन्धे -** Bali was a powerful demon, the grand-son of Prahlada. Through the merit of his pious acts and munificence, he drove away Indra from heaven and deprived him of all his possessions. Being entreated by the gods, V isnu incarnated himself as a dwarf and was born in the womb of Aditi, the mother of Indra. The dwarf then went to Bali and asked for three paces of ground from him, to which, Bali readily agreed. The dwarf then expanded himself and by his two huge feet occupied earth and heaven and asked for the third



pace as promised by the demon. Bali then held out his own head and a third foot shooting out of the dwarf 's navel pressed Bali to the lower region. Then the dwarf bound down Bali with a promise that he (Bali) would never come out of his lower region where he would confine all his activities. Since then Bali did not come out and torment the gods.

**जलधिर्ममन्थे-** The gods, being constantly beaten by the demons, thought out a plan to strengthen and immortalize themselves and in consulation with V isnu churned the ocean. The Mandara mountain was used as the churning rod and the great snake V asuki become the string to resolve the rod. In course of churning, nectar and all other valuable things, such as-the horse of Indra (उच्चैःश्रवा) Laksmi, etc, came out of the ocean.

**जहेऽमृतम्-** As soon as the nectar came out in course of churning, the demons, who also participated in the af fair, forcibly took away the vessel of nectar and hide it. The gods, being disappointed, approached V isnu, who, assuming the form of the most beautiful woman, went to the Asuras and let them know her intention that she would distribute nectar among them so that there might not be any quarrel among them The Asuras readily agreed and when they were preparing to drink nectar served by that beautiful lady, Mohini by name, she ran away with the vessel of nectar and gave it to the gods who then took it and became immortal and suf ficiently strong to cope with the Asuras.

**दैत्यकुलं विजिग्ये-** This refers to the destruction of various Asuras, the sons of Diti, by Visnu in His various Incarnations.

**बबन्धे-** बन्ध् + कर्मणि लिट् ए।
**जहे-** हृ + कर्मणि लिट् ए।

Sl. 40.

**प्रीतमनाः-** प्रीतं मनः यस्य (बहु), सः।

Sl. 41.

**जनकाश्रमस्थम्-** जनकस्य आश्रमः (६ष्ठी तत्); तत्र तिष्ठति इति उपपद समासे जनाकाश्रम-स्था-क।

Sl. 42.

**अजिग्रहत्-** ग्रह् + णिच् + लुङ् द।
**अभाङ्क्षीत्-** भञ्ज् + लुङ् द।

Sl. 43.

**मैथिलमर्त्यमुख्यः-** मैथिलाः मर्त्याः (कर्मधा); तेषां मुख्यः (६ष्ठीतत्); मिथिला एषां वासः इति मिथिला + अण् मैथिल। म्रियन्ते प्राणिनः अस्मिन् इति मृ + तन् (औणादिकः) = मर्त्यः; मर्त्ये भवाः इति मर्त्य + यत् = मर्त्या, यद्वा, स्वार्थे यत्; मुखमिव इति मुख + यत् = मुख्यः।

Sl. 45.

**आर्च्चीत्-** अर्च्च् + लुङ् द।
**वरिष्ठम्-** अतिशयेन उरुः (महान्) इति उरु + इष्ठन्।

Sl. 46.

**अगात्-** इ + लुङ् द।
**वभाषे-** भाष् + लिट् ए।

Sl. 47.

**अचिरप्रभा-** अचिरा प्रभा यस्याः (बहु), सः। न चिरा (नञ् तत्)। ददे = दा + कर्मणि लिट् ए।



Sl. 48.

**उदवोढ-** उत्-वह् + लुङ् त।
**संवंहयन्तीम्-** सम् - वह् + शतृ + ङीप् स्त्रियाम् + २/१.

Sl. 49.

**सुप्रातम्-** शोभनं प्रातः यस्य (बहु), तत्।
**अगात्-** इ (इण् गतौ) + लुङ् द।

Sl. 50.

**जामदग्न्यः-** जमदग्नेः अपत्यं पुमान् इति जमदग्नि + षञ्।

Sl. 51.

**आहवत-** आ-ह्वे + लुङ् त।
**अतियासीः -** अति-या + लुङ् स।

Sl. 52.

Allusion :- Parasurama, the son of the sage Jamadagni, who married the sister of Vis'vãmitra who was originally a ksattriya, is known for his massacre of the ksattriya race. Kartavirya, a king of the Haihaya dynasty, once came to the hermitage of Jamadagni as a guest and after due hospitality being shown to him, he asked for himself the wish yielding cow (कामधेनु) of Jamadagni, with whose help the sage was able to render hospitality to the king and his vast train of retinue. Jamadagni refused to grant his prayer and at this the king grew angry and killed jamadagni and took away the cow per force. Parasurama was not present in the hermitage at that time. After his arrival when he came to know of the outrage perpetrated by the king who was entrusted with the sacred duty of the protection of varnasrama, he grew furious and took up the vow of

extirpation of the whole ksattriya race along with their male children. Twenty one times he committed outrages on the Ksattriyas and made five pools of blood with which he offered libations to his dead-ancestors. The same incident is referred to here by Dasaratha who got nervous at the recollection of what he did in the past.

**संक्षप्य-** सम्-क्षिप् + ल्यप्।
**संरम्भम्-** सम्-रभ् + घञ् + २/१।
**आस्था-** आ-स्था + अङ्।
**रामे-** विषयाधिकरणे ७मी। दाशरथि = राम।

Sl. 53.

**अजीगणत्-** गण् (चुरादि) + लुङ् द।
**दाशरथम्-** दशरथस्य इदमिति दशरथ + अण्, "तस्येदम्"।
**कुमारः-** रामः इत्यर्थः।
**व्यकार्क्षीत्-** वि-कृष् + लुङ् द।
**गुरुवाणगर्भम्-** गुरुवाणो गर्भः यस्य (बहु), तत्; गर्भयतीति गर्भ + अच् = गर्भः।
**अलावीत्-** लु + लुङ् द।

Sl. 54.

**जिते-** जि + क्त कर्मणि + ७/१
**नृपारौ-** भावे ७मी; नृपाणां अरिः (६ष्ठी तत्), तस्मिन्।
**जगाहिरे-** गाह् + लिट् + इरे।
**अनेकमुखानि-** अनेकानि मुखानि येषाम् (बहु) तानि।

Sl. 55.

**दवय-** दूरं करोति इति दूर (दव) + णिच्-दवय (नामधातु) + शतृ।
**आयात्-** आ-या + लङ् द।

1 1 1 1



२

भवदेव भागवतीविरचिते

# सती जयमतीकाव्ये

लसतु लसतु वाणी श्वेतपद्मे सुरम्ये
चलतु चलतु हंसी पादपार्श्वे जनन्याः।
वदतु वदतु वीणा रम्यहस्ताच्च तस्या
दहतु दहतु विघ्नं सैव भासा सुहासा॥ १॥

कृतमुनिजनवासो ब्रह्मणः सृष्टिवर्य्यः
सुजलसुफलपूर्णः पूतरत्नप्रकृष्टः।
विविधविभवधन्यः पर्वतैरीक्ष्यमाणः
स्मरति परमभाग्यं कामरूपप्रदेशः॥ २॥

श्रवणसुभगशब्दैः सान्ध्यलालित्यकान्तै-
र्गिरिवरतनुरुद्धैर्व्याप्तमञ्जुनिकुञ्जैः।
ऋषिवर इह हृष्ट पुण्यवान् सत्यरूपो
विमलतपसियुक्तो भूतवान् वै वशिष्ठः॥ ३॥

चलतु निखिलपापं सेवकानामुमाया
भवतु च भवभीतः शोकहीनः सुरूपः।
असुरमथन इत्थं दिव्यभावात् परेशो
भगमिह भगवत्या नीलशीर्षे मुमोच॥ ४॥

चिलरय हरिलाचित शङ्करादिप्रमुख्याः
शुभतनयसमूहा आविरासन् जनन्याः।
विमलसलिलधन्यो ब्रह्मपुत्रः सुपुत्रो
मुनितनयप्रदत्तः शोभतेऽद्यापि भूमौ॥ ५॥

मधुरिपुरपि कृष्णो रुक्मिनीशुभ्रहस्तम्
जनपदमिममेत्य प्रेमभावाद्दधार।
ललितवचनजाले विस्वकेतुरुषाया
श्चकित हरिणनेत्रे केशवेशे च मुग्धः॥ ६॥

घटकनरकबाणा नारकेयः सुधन्वा
कमतनृपतिमुख्या राजवृन्दा वरेण्याः।
भरतजनपराज्ये भारते ख्यातवीर्य्या
मणिमरकतचित्रां कामभूमिं शशासुः॥ ७॥

अथ सुरपतिरस्या ज्ञानवान् वै समस्तम्
निजजननकुलस्य स्वर्गिणः संदिदेश।
अधिकुरुत कुलीना मर्त्यजन्म प्रगृह्य
नियतिनटनमञ्चं कामरूपप्रदेशम्॥ ८॥

नहि सरति भवेऽस्मिन् स्वेच्छया कोऽपि देही
प्रभवति किल तस्मिन् विश्वपो विश्वमूर्तिः।
अथ विधिनियमात्ता देवता दिव्यरूपा
नृपपदमधिचक्रुः श्यानदेशे प्रसिद्धे॥ ९॥

रिपुकुलदलने ते शक्रतुल्यप्रभावाः
परनृपतिकृतायां सन्धिनीतौ सुविज्ञाः।
सुगतरचितधर्मे विष्टचित्ता विशुद्धाः
सुखिजनगणपूर्णं भुक्तवन्तः स्वराज्यम्॥ १०॥



बहुसुरभिप्रयाणे पूर्वपार्वत्यभाजे
खुनलुङसहजातः खुन्लइः सभ्यराजः।
अतुलनगरवेशं मुंरिमुंरामदेशम्
ससुखमशिषदब्दान् शासने श्रीनिवासः॥ ११॥

शतशरदमतीत्य पार्थिवः सिंहवीर्य्यः
सुरसदनमयासीद्भक्तिमान् शाक्यसिंहे।
शिशिरकमलतुल्यं सर्वसारैर्विहीनम्
यत इह नरदेहं कालदण्डैर्विदीर्णम्॥ १२॥

मृतकविपुलराज्यं वीक्ष्य भूपैर्विहीनम्
प्रकृतिसकलमुख्यैर्भूपतौ दत्तचित्तैः।
अधिगत इह राजा खुन्लुङः सन्ततिर्वै
शुभजनपदचीनात् ख्यातवीर्य्यो वरेण्यः॥ १३॥

नवनरपतिवंशे वीरसिंहश्चुकाफा
अभवदिह नृपालः कार्यधैर्य्यस्य तस्य।
प्रथितयशस आख्या वायुवद्वेगवत्यः
श्रवणविवरमित्वा मानवान् मोदयन्ति॥ १४॥

मृगमदरदधन्ये जातकौषेयरम्य
उपवनयुजिदेशे चोत्सुकोऽस्मिंश्चुकाफा।
भटगजपृतनाभिर्विक्रमे कार्त्तिकेयो
विजयसमयवाद्यं वादयन् सम्प्रतस्थे॥ १५॥

विजितसदननर्दी शुद्धसाम्राज्यवादी
स हि नृपतिचुकाफाः प्रेत्य सौमारपीठम्।
परिजयति किलात्र व्रीड़ितं स्वस्तिहानात्
सपदि मटकभूपं राष्ट्ररक्षाप्रसक्तम्॥ १६॥

1 1 1 1

# Sati Jayamati

# सती जयमती

## Introduction :

The Sati Jayamati of Bhabadev Bhagavati, a Khandakavya composed in one hundred verses contains the glorious story of a lady martyr Jayamati by name. Jayamati was the wife of Gadapani, the young son of king Gobar.

The Khandakavya Sati Jayamati of Pandit Bhagavati contains three sections or cantos called Pravãhas. The first Pravãha contains an invocation of goddess Saraswati, description of Kamarupa, origin of the Ahom Royal family, the achievements of king Chukafa and the glory of Assam.

The second Pravaha is devoted to the description of the political situation of that time and of Gadapani, qualities of Jayamati, her marriage with Gadapani, birth of their children and their conjugal life.

The third Pravaha presents the descriptions of the political instability of Assam, accession of Culikfa, killing of the boys of the royal families, parting of Gadapani from Jayamati and his sons on the eve of his death, advice of Jayamati to Gadapani to go underground, arrest of Jayamati and her punishment, dialogue between Jayamati and Gadapani in desguise and the death of Jayamati etc.



The Sati Jayamati is a fine Poem wherein the Hero and the heroine all portrayed as ideal characters. The heroin Jayamati sacrificed for life for the safety of her husband Gadapani who ultimately occupied the royal throne and became able to bring the stability back to the kingdom.

The author :

Bhabadev Bhagavati, one of the great Sanskrit scholars of Assam was born in the village Kaithalkuchi in the district of Nalbari in the year 1902. A traditional Pandit with the certificate of Matriculation (double) specialised in Ratnamala Vyakarana and Purana from Assam Sanskrit Board. Later on, in 1931, he specialised himself in the Vedanta Darsana from Calcutta Sanskrit Association.

Pandit Bhabadev Bhagavati joined the Govinda Mishrashram Sanskrit Tol (Barbhitha, Belsor) as an Adhyapaka; then joined Chamata High School and served the same as the Sanskrit teacher till his retirement in the year 1968. With his command in Sanskrit, Bhagavati wrote two Sanskrit Text Books, namely Kathakusumam in two parts.

He was a creative writer and a good composer of verses in Sanskrit. The Sati Jayamati and Slokamala are the fine specimen of his poetic compositions. The Slokamala is an anthology of Sanskrit slokas or verses on different topics. It contains 229 verses including the benedictory verses and excluding the verses in the appendix. The number of the benedictory verses is 9. The different topics of the work, Slokamala include description of India Assam, Sankaradeva, Tea (syamaparni), Dharmapur area and the use of विभक्तs with different Karakas. The verses are sweet to recite.

Pandit Bhagavati also wrote some works in Assamese such as Bheko Bhaona, Sukhar Sapon, Petar Kathakusum and Lila. Lila is an Assamese novel. Nutanam Natakam and Bhishanam Natakam are his two other credits. He was also awarded the President of India's Certificate of Honour in 1982. Bhabadev Bhagavati received literary award and Literary Pension of the Assam Government in 1977 and 1987, respectively. These are all because of his literary activities.

A great scholar of Sanskrit of Assam, Pandit Bhagavati died in the year 1988.

## Notes :

Sl. 1.

This verse is a Mangalacarana (Eulogy) as it is a prayer to the goddess of learning (Saraswati).

लसतु- Öलस् + लोट् तु। Öलस् means to shine.

The twice repetition of the verbal forms लसतु, चलतु, वदतु and दहतु is made to mean "again and again".

वाणी is used to mean Saraswati.

The metre (छन्द) employed in the verse in मालिनी, a Samavrtta type of छन्द containing 15 syllables in each pada of a verse. It is defined as "ननमययुतेयं मालिनी भोगिलोकैः।"

Sl. 2.

सृष्टिवर्य्यः - सृष्टेः वर्य्यः।



वर्य्यः - Öवृ + ण्यत्। वर्य्यः means principal, chief.

ईक्ष्यमाणः - Öईक्ष् + शानच् = looking at.

स्मरति - Öस्मृ + लट् ति।

वासः - Öवस् + घञ्।

The metre in this verse is मालिनी।

Sl. 3.

**ऋषिवरः -** ऋषीणां ऋषिसु वा वरः। निर्धारणे षष्ठी सत्पमी वा by the sutra "यतश्च निर्धारणम्"। Greatest among the sages.

**हृष्टः -** Öहृष् + क्त।

**भूतवान्-** भूतः अस्ति इति भूतवान्। भूत् + वतुप्।

**वशिष्ठ-** Greatest sage. Family priest or Guru of king Dasaratha, father of Lord Rama.

The metre herein this verse in मालिनी।

There is the figure of word called अनुप्रास (Aliteration) in the word "व्याप्तमञ्जुनिकुञ्जैः" in the above verse. अनुप्रास is defined as- "अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत्।"

Sl. 4.

**भवभीतः -** भवात् भीतः। (पञ्चमी तत्पुरुषः समासः।) भयार्थे पञ्चमी विभक्ति by the sutra "भीत्रार्थानां भयहेतुः।।" भव means संसार (world)

**सुरूपः -** सु शोभनं रूपं यस्य सः, बहुव्रीहि समासः

**मुमोच-** Öमुच् + लिट् अ। Öमुच् means 'to leave'.

The metre employed in this verse is मालिनी।

Sl. 5.

Sankaradeva and Harideva were the religious preachers of Assam and are known as Mahapurusa of Vaisnava Dharma. Boht flourished in 15th century.
Chilaraya was the brother of Kocha king Naranarayana. Lachit Barphukan was the great chief of Ahom soldier who defeated the Mughals. Brahmaputra is the great river of Assam.

**आविरासन्-** आ- वि + Öअस् + लङ् अन्।

**चिलरय-** stands for चिलाराय। Both the आकारs are dropped to maintain the metre i.e. मालिनी।
The शब्दालंकारs viz, अनुप्रास and यमक are used in the word विमलसलिल धन्यः and ब्रह्मपुत्रः सुपुत्रः respectively.

Sl. 6.

**एत्य-** आ-Öइ + ल्यप्। Öइ means 'to go'.
**दधार-** Öधा + लिट् अ।
**मधु-** Name of demon killed by Lord Krishna.
**जनपद-** means kingdom.
The metre in the verse is मालिनी।

Sl. 7.

**ख्यातवीर्याः -** ख्यातं वीर्यं येषाम्, ते। बहुव्रीहिसमासः।
**शशासुः -** Öशास् + लिट् उस्।
**नारकेयः-** नरकस्य अपत्यं पुमान्। नरक + ढक्।



Sl. 8.

सुरपति is the name of Indra, the lord of the gods.

**स्वर्गिणः-** स्वर्ग + इनि + 2nd case-ending plural.
Those who are in heaven.
**संदिदेश-** सम् - दिश् + लिट् अ।
**प्रगृह्य-** प्र - ग्रह + ल्यप्।
**अधिकुरुत-** अधि- कृ + लोट् त।
The metre in this verse is मालिनी।

Sl. 9.

**भवे-** In this universe. भव means संसार, अधिकरणे ७मी विभक्ति।
**देही-** Being having a soul. देह means body. देहः अस्य अस्ति इति देहिन्। Nominative singular form of देहीन् is देही।
**विश्वपः-** विश्वं पाति यः सः, बहुव्रीहिसमासः।
protector of the universe.
**दिव्यरुपाः-** दिव्यानि रुपाणि यासां ताः, बहुव्रीहि।
**अधिचक्रुः-** अधि- Öकृ + लिट् उस्।
The metre in this verse is मालिनी।

Sl. 10.

**शक्र-** Öशक् + रक्। Name of Lord Indra.
**दलन-** Öदल् + ल्युट्। Dominance.
**सुगत-** Name of Lord Buddha, the founder of the Buddhist philosophy.
**भुक्तवन्तः-** Öभुज् + क्तवतु + पुंलिङ्ग + १मा बहुवचन।

**सन्धिनीतौ-** सन्धेः नीतिः, षष्ठी ततपुरुष्ः, तस्याम्।
The metre in this verse is मालिनी।

Sl. 11.

**सुरभि-** सु- Örभ् + इन्। सुरभि stands for spring season.
**प्रयाणे-** प्र- Öया + ल्युट् + ७मी एकवचन; भावे सप्तमी by the rule 'यस्य च भावेन भावलक्षणम्' of Panini.
**ससुखम्-** सुखेन सहितम्, बहुब्रीहि समास।
**अशिषत्-** Öशास् + लुङ् द।
**श्रीनिवासः-** श्रियः निवासः; षष्ठी तत्पुरुषसमासः। श्री means prosperity or fortune.
The metre in the verse is मालिनी।
There is अनुप्रास शब्दालंकार in 'शासने श्रीनिवासः''।

Sl. 12.

**शाक्यसिंह-** An epithet or name of the lord Buddha.
**भक्तिमान्-** भक्ति + मतुप्।
**अतीत्य-** अति- Öइ + ल्यप्।
**विदीर्णम्-** वि- Ödृ + क्त।

Sl. 13.

**वोक्ष्य-** वि- Öईक्ष् + ल्यप्। Having seen or observed.
**अधिगतः-** अधि- Öगम् + कर्मणि क्त। placed.
**सुभजनपदचीनात्-** शुभजनपदचीन + तसिल् (by the rule पञ्चम्यास्तसिल्)।
**दत्तचित्तैः-** दत्तं चित्तं यैः, तैः, बहुब्रीहि समास।
**ख्यातवीर्यः-** ख्यातं वीर्यं यस्य सः, बहुब्रीहि समास।
**वरेण्यः-** Övृ + एन्य।



Sl. 14.

**नृपालः-** नृन् पालयति इति नृपालः। A king.
**प्रथितयशसः-** प्रथितं यशः यस्य; तस्य बहुब्रीहिसमास।
**इत्वा-** Öइ + क्त्वाच्।
**मोदयन्ति-** Öमुद् + णिच् + लट् + अन्ति।

Sl. 15.

**कार्तिकेयः-** कृत्तिका + ढक्।
**वादयन्-** Öवाद् + शतृ + १मा एकवचन।
**सम्प्रतस्थे-** सम्- प्र + Öस्था + लिट ए।

Sl. 16.

**विजितसदननर्दी-** विजितं सदनं विजितसदनम्, कर्मधारयसमासः, विजितसदनेन नर्दः यस्य सः विजितसदननर्दी, बहुब्रीहिसमासः।
**नर्दः-** Öनर्द् + अच्।
**विजितः-** वि- Öजि + क्तः।
**प्रेत्य-** प्र- Öइ + ल्यप्।
**व्रीडित-** Öव्रीड् + क्त।
**स्वस्तिहानात्-** हेतौ पञ्चमी, स्वस्तेः हानम्, तस्मात्।
**हान-** Öहा + ल्युट्।
**प्रसक्तम्-** प्र- Öसञ्ज् + क्त।

l l l l

३

# असमीया संस्कृतिः

डॅ अशोक कुमार गोस्वामी

असमीया संस्कृतिस्तावदसमीयाजातेः संस्कृतिः। असमीयासंस्कृतिरेव असमीयाजातीयजीवनस्य प्रवाहिका। बहुजात्युपजातिसंमिश्रणेन गठितेय-असमीयाजातिः। अतोऽसमीयासंस्कृतिः खल्वनेकैः सांस्कृतिकोपादानैः विकसिताऽस्ति। विभिन्नजनगोष्ठीनां वैचित्रपूर्णनि वैशिष्ट्याधायकानि च सांस्कृतिकोपादानानि असमीयासंस्कृतौ सन्निविष्टानि सन्ति। अस्याः संस्कृतेः क्षेत्रं सुविशालं समुन्नतञ्चेति ऐतिहासिकं निर्विवादञ्च तथ्यम्। सुप्राचीनः सुदीर्धश्चास्याः संस्कृतेरितिहासः। आर्याणां निषादानां मङ्गोलीयानां (किरातानां) च संस्कृतित्रयस्य समन्वयेनासमीयासंस्कृतिरजायत। द्राविड़ संस्कृतेः प्रभावः अस्यां संस्कृतौ स्पष्टं नोपलभ्यते। उपर्युक्तस्य संस्कृतित्रयस्य समन्वयेन संसृष्टेयं संस्कृतिः परवर्तिकाले आहोम-कोचादि विभिन्न जनगोष्ठीनां प्रभूतावदानैः समृद्धिं गता।

तदित्थमस्यां संस्कृतौ मूलतः विभिन्नानां जनगोष्ठीनां समावेशः वरीवर्त्ते। तथाप्येयं संस्कृतिः मिश्रिता संस्कृतिरिति वक्तुं न शक्यते, यतो हि शतशतवर्षेभ्यः पारस्परिकसौहार्देन गुणग्राहिमनोभावेन प्रेम्ना संप्रीत्या च विभिन्नानां जनगोष्ठीनां सहवासेन सैषा संस्कृतिरभिनवतया साम्प्रतमेकं रूपमाधत्ते। असमप्रान्ते अधिकांशतः जनाः अनार्यमूलीयाः। किन्तु प्रान्तस्यास्य



भाषा असमीया या खलु आर्यमूलीया। अतः आर्यानार्याणां जातिगतमिलनेन असमीया संस्कृतिरिति नामधेया सुदृढ़ा संस्कृतिरियं विकासं गाता। यदि साम्प्रतिकी असमीया संस्कृतिः निरीक्ष्यते तदाऽनुभूयते यदस्यां स्थानीयजनगोष्ठीनां सांस्कृतिकोपादानैः सह सर्वभारतीय सांस्कृति-कोपादानान्यपि समधिकतया विराजन्ते। बहुवर्णेयं संस्कृतिः महत्याः विशालायाश्च भारतीयसंस्कृतेः शाखाविशेषैव।

त्रयोदशशातिकायां ब्रह्मपुत्रोपत्यकायां चुकाफानामकेन आहोमनृपतिना राज्यं स्थापितम्। तदारभ्य भौगोलिकभावेन जातमसमराज्यं, जाता चासमीया संस्कृतिः। अवश्यम् असमीयासंस्कृतिः इत्याख्याप्राप्तेः कतिपय सहस्र वर्षपूर्वेभ्यः एव अस्य संस्कृतिवृक्षस्य मूलस्योद्गमो बभूव। तदेव बृक्षमूलो कालक्रमेंण संवर्धितं पत्रैः पुष्पैः फलैश्च सुशोभितं सत् महीरुहे परिणतमभवत्।

अस्य असमीयासंस्कृतेः परिसीम्नि स्वाभाविकतयाऽसमीयाजनानां भाषा-साहित्यं, रीतिः, नीतिः, धर्मः, मानसिकोत्कर्षः, सुकुमारकला, स्थापत्यं, भास्कर्यं, लोकविश्वासादयोऽन्तर्भुक्ताः सन्ति। पृथिव्याः अन्यान्यसंस्कृतिरिव असमीयासंस्कृतेरप्येतिहासे राजनैतिक-सामाजिकार्थिकोत्थान-पतनाभ्यां समकालं सांस्कृतिकोत्थानपतने तथा च परिवर्तनपरिवर्धनेऽपि दृष्टिपथमायान्ति।

असमीयासंस्कृतौ नैकविधाः स्ताराः नैकविधानि स्रोतांसि च परिलक्ष्यन्ते। विभिन्नेषु स्तरेषु विभिन्नानां स्रोतसां मेलनं जायते। प्रागैतिहासिकः पौराणिकः मध्ययुगीयः आधुनिकश्चेत्यस्याः चत्वारः स्तराः खीष्टपूर्वद्वितीयवर्षतः तृतीयवर्षतो वा खीष्टीयद्वादशशातिकायाः अन्तिमभागपर्यन्तमर्थात् पालवंशीयनृपतीनां पतनपर्यन्तमस्याः संस्कृतेः प्राचीनयुगम्, खीष्टीयत्रयोदशशतिकायाः प्रारम्भतोऽर्थात् टाइ-चीनगोष्ठीय-आहोमानामागमनादारभ्य खीष्टीयोनविंशशतिकायाः आदिभागपर्यन्तं मध्ययुगम्, खीष्टीयोनविंशशतिकायाः मध्यभागादारभ्यार्थात् बृटिशजनानामागमनकालादारभ्य वर्तमानं यावदाधुनिकयुगमिति इतिहासविदामभिमतम्। पूर्वोक्तदिशा स्तरचतुष्टयेऽस्मिन् अष्ट्रिक-

मंगोलीयार्यप्रभृतीनां विभिन्नानां जातिगोष्ठीनां पृथक्-पृथक् सांस्कृतिकसम्भाराणामेकत्र समन्वयो जायते।

असमीयासंस्कृतौ लोकसंस्कृतेः प्रभावः समधिकोऽस्ति। जनजातीनां संख्याधिक्यमेवात्र मुख्यं कारणम्। योगिनीतन्त्रे प्रोक्तमस्ति यत् कामरुपस्यार्थात् प्राचीनासमस्य संस्कृतिः कैराजेति। अस्यां किरातजनगोष्ठ्यामर्थात् मङ्गोलीयजनगोष्ठ्यां बड़ो, गारो, डिमाचा, लालुं, सोनोवालकचारी, राभा, मिरि (मिछिं), मिकिर, कार्बीत्यादयोऽन्तर्भुक्ताः। प्रायः पञ्चाशत्जनजातयः सन्ति ये खलु स्व-स्व-रीति-नीति-परम्परा-धर्मविश्वासादिकमनुसरन्ति। श्रीमतः शङ्करदेवस्य प्रादुर्भावात् पूर्वत एव विभिन्नलोकधर्माणां प्रभावोऽत्र दृग्गोचरीभवति। असमीया संस्कृतौ लोकसंस्कृतेः छायाऽनपह्नवनीया। लोकसाहित्यं लोकविश्वासश्चास्याः लोकसंस्कृतेरुत्सः। इयञ्च लोकसंस्कृतिः विभिन्नजनजातीयगोष्ठीनां धर्मानुष्ठानानां पूजापद्धतीनां लोकविश्वासानां रीति-नीतिनामाख्यानोपाख्यानानां प्रकृतिव्याख्यानानां नृत्यनाट्याभिनयानां क्रीड़ादीनाञ्च समाहारः।

असमीयासंस्कृतेः पूर्वोक्तं प्राचीनयुगं ख्रीष्टपूर्वद्वितीय शतिकातः तृतीयशतिकातो वा स्वीकर्तुं शक्यते। तस्मात् प्रभूति ततः पूर्वतो वा असमप्रदेशस्य ब्रह्मपुत्रोपत्यकायां कृतवासानामष्ट्रिकगोष्टीयजनानां सामाजिकप्रथायाः शिल्पकर्मणश्च न्यूनाधिकः प्रभावः असमीयासंस्कृतौ असमीयासमाजे च परिलक्ष्यते। अस्य युगस्य प्रारम्भत एव तत्कालिकनिवासिभिः तिब्बतवर्मीयगोष्ठीजैः हिन्दुशैवधर्मोऽङ्गीकृत आसीत्। फलतस्तदानीमेव कामरुपे हिन्दुधर्मस्य तथार्यसंस्कृतेः प्रतिष्ठा समजायत। परन्तु विविधैः कारणैरार्यसंस्कृतिरेषा सर्वसाधारणेषु नैव प्रथिताऽऽसीत्। तथापि ख्रीष्टीयप्रथमद्वितीयशतिकातः नवमदशमशतिकावधै प्राधान्येन शैवशाक्तधर्मयोः माध्यमेन हिन्दुसंस्कृतिः विभिन्न जनगोष्ठीषु प्रसारिताऽभवत्। सहैवार्यसंस्कृतिरेषा किराततिब्बतबर्मी प्रभृतिविभिन्नजनगोष्ठीनां रीति-नीत्याचारविचारस्वरसुरादिकं समाहत्य एकस्याः यौगिकसंस्कृतेः रूपेण विकसिता संजाता। आलोच्यमानायां प्राचीनासमीयासंस्कतौ तान्त्रिकबौद्धधर्मीयसंस्कृतिरपि प्रवेशं लेभे। एवं क्रमेण



संस्कृतिरियं प्राचीनयुगस्य मध्यभागत एव प्रगतिं प्राप। ख्रीष्टीयसप्तमशतिकाया नृपस्य भास्करवर्मणोऽन्येषाञ्च राज्ञां निधानपुरादिविभिन्नताम्रशासनेभ्य इयमैतिहासिकी प्रगतिः ज्ञातुं शक्यते। अस्मिन्नेव युगे मठ-मन्दिर-दुर्ग-नगरादिनिर्माणे भास्कर्यस्थापत्ययोरुन्नतं रूपं प्रकाशमायाति। हाजोस्थिते हयग्रीवमन्दिरे नीलाचलपर्वतस्थिते कामाख्यामन्दिरे कामरुपस्थितेषु मदनकामदेवदीर्धेश्वरीप्रभूतिषु शोणितपुरस्थितेषु महाभैरवादिषु शिवसागर मण्डलावस्थितेषु आहोमयुगीयेषु रंघर-कारेंघर-तलातलिघरप्रभृतिषु लभ्यमानानि कारुकार्याणि उत्कृष्टानि सांस्कृतिकानि निदर्शनानि सन्ति। पुत्तलिकानृत्यमपि प्राचीनासमीयसंस्कृतेरेकमपरं सांस्कृतिक निदर्शनं समस्ति। हस्तीविद्यार्णव-चित्रभागवत-दरंराजवंशावलीप्रभृतिषु प्रकाशं गता प्राचीनाऽसमीयाचित्रकलाऽपि असमीयासंस्कृतेः उत्कृष्टतां व्यनक्ति। संस्कृतमय (ताम्रादि) शासनेषु मनोग्राहि काव्यिकसौन्दर्यमुपलभ्यते। अस्मिन्नैव काले सहजिया सिद्धाचार्यैः विरचितानां चर्यापदजातानां असमीयाभाषिकसंस्कृतौ विशिष्टावदानं समस्ति। मौखिकं साहित्यमपि युगस्यास्य अन्यतममवदानम्। सप्तमाष्टमशतिकयोर्मध्ये मौखिकसाहित्यसमूहः लिपिबद्धोऽजायत। बिहुगीतानि डाकवचनानि, योजोनाभिधेयानि विवाहगीतानि, धातृगीतानि, साधुकथेति ख्यातान्याख्यानानि भठेली गीतानि, महोहो गीतानि इत्यादीनि मौखिकसाहित्यान्तर्गतानि असम प्रान्तस्यामूल्याः सांस्कृतिकसम्पदः। ढोल-पेपा-टका-गगना-मादल-चिफुं-बाँहीप्रभृति-वाद्ययन्त्राणि आर्येतरगोष्ठीभ्यः समागतानि असमीयासंस्कृतौ सन्निविष्टानि। देओधनि (देवध्वनि) नामकं मन्दिरेषु प्रचलितं देवदासीसमं नटीनृत्यमपि अस्मिन्नेव युगे सृष्टम्, मध्ययुगस्य मध्यभागे अर्थात् ख्रीष्टीयपञ्चदशषोड़शशतिकयोः असमस्य राजनौतिकक्षेत्रे कोचानामाहोमानाञ्चाभ्युदये जाते समाजे प्रबलमेकं सांस्कृतिकं जागरणं जातम्। जागरणेऽस्मिन्अहोम-चुतीया-कोच-कछारी प्रभृतीनां राजवंशानामवदानं स्वीकरणीयमस्ति। विशेषतः नववैष्णवान्दोलनमेव असमीयासंस्कृतेर्विकासे महत्तममवदानं दत्तवत्। चालि-क्षुमुरा प्रभृतीनां संमुदायेन खातं सत्रीयानृत्यं, बड़गीत प्रभृतिभक्तिमूलकगीतानि, पारिजातहरण-रुक्मिणीहरण प्रभृति-अंकीयनाटेति ख्यातानि नाटकानि

असमीयासंस्कृतौ परमसम्पदः। इछ्लामीयसंस्कृतेः जिकिर-जारि नाम्ना ख्यातानि सुमधुरगीतानि प्रसिद्धं गतानि।

उपर्युक्तायाः प्राचीनकालिकसंस्कृतेः भित्तावेव सेयमसमीयासंस्कृतिः परिवर्तिता संवर्द्धिता च सती मध्ययुगे तदनन्तरमाधुनिकयुगे च स्थितिं लेभे। साम्प्रतिक्याः असमीयासंस्कृतेः अविच्छिन्नान्यङ्गानि प्रधानोत्सवानुष्ठानानि विभिन्नमानवगोष्ठ्या गठितेऽपि असमीयसमाजे जातिधर्मवर्णनिर्विशेषतया असमीयाजनानां कृषिरेव जीविकानिर्वाहाय माध्यमरूपेण गृहीताऽस्ति। अतः कृषिकर्मणा संवद्धाः उत्सवा एव प्रधानोत्सवाः। वर्तमानकाले यद्यपि बहुसंख्यकाः सन्ति तथापि कृषिमूलकानामुत्सवानां महत्त्वमिदानीमपि वरीवर्ति। एतेषु कृषिमूलकोत्सवानुष्ठानेषु विभिन्नगोष्ठीयजनानां रीतयो नीतयश्च प्रविष्टाः सन्ति, सहैव हिन्दुधर्मीयाः बहवो नियमा अपि सन्निविष्टाः वर्त्तन्ते। कृषिकर्मणा संबद्धः प्रधानोत्सवः भवति बिहुः। स चोत्सवः सम्प्रति जातीयोत्सवमर्यादां लभते। बिहूत्सवः त्रिविधः, बहागबिहु अथवा रंगालीबिहु, कातिबिहु अथवा कंगालीबिहु, भोगालीबिहु चेति।

चैत्रवैशाखमासयोः संक्रान्तौ बहागबिहुत्सवः पालितो भवति। तत्रापि प्रथमदिवसे (संक्रान्तिदिवसे) विशेषतः गोपरिचर्या भवतीति कृत्वा दिवसोऽयं गरुबिहु इति नाम्ना ख्यातोऽस्ति। ततः परस्मिन् दिवसे अर्थात् वैशाखमासस्य प्रथमदिवसे जनैः देवपूजनं आत्मीयजनानां सत्कारः आत्मीयैः सह संप्रीत्या मेलनादिकं क्रियते, अतोऽयं दिवसः मानुहबिहु इति कथ्यते। ततोऽपरदिवसे चेराबिहु पाल्यते। अस्मिन् बिहूत्सवे दलबद्धाः लोकाः बिहुगीतमिति प्रसिद्धानि गीतानि, प्राधान्येन प्रेममूलकानि गायन्ति, ढोलपेपाटकाप्रभृतिवाद्यानि वादयन्ति, सोल्लासं नृत्यञ्च कुर्वन्ति। तदेव नृत्यं 'बिहु नृत्य' इति नाम्ना विश्वे प्रसिद्धम्। आश्विनकार्तिकमासयोः संक्रान्तौ कातिबिहूत्सवः पालितो भवति। अस्मिन्नुत्सवे गृहस्थाः गृहस्य सम्मुखे मृत्वेदीं निर्माय तत्र तुलसीवृक्षस्य रोपनं दीपप्रज्वालनादिकञ्च कुर्वन्ति। पौषमाघमासयोः संक्रान्तौ भोगालीबिहूत्सवस्य आयोजनं भवति। अस्मिन्नवसरे लोकाः मठमन्दिरप्रांगने, 'भेला'गृहे अथवा 'मेजि'गृहे एकीभूय



क्रीड़ादिभिः सामूहिकभोजनेन चात्मानं रञ्जयन्ति। अवसरेऽस्मिन् प्रस्तुतानि चिरा-मुरि-आखै-खोलापिठा-घिलापिठा-चुङाचाउल-चुङापिठादीनि विविधानि स्थानीयसुमिष्ट खाद्यानि असमीयासंस्कृतेः विशिष्टोपादानानि सन्ति। अण्डयुद्ध-कुकुटयुद्ध-महिषयुद्धादिक्रीडाभिः जनाः अत्रावसरे आत्मानं विनोदयन्ति। 'नामनि-असम' इत्याख्ये असमराज्यांशो प्रचलितः भठेलि इत्युत्सवोऽपि सर्वसाधारणानामुतसवो भवति। असमीयाजनैः बहुकालादेव पाल्यमानानि हिन्दुधर्मीयानुष्ठानानि मूलतः सर्वभारतीयानि सन्ति। तद्यथा शिवरात्रिः, रासोत्सवः, दुर्गापूजा, लक्ष्मीपूजा, कालीपूजा, सरस्वतीपूजा, विश्वकर्मापूजा, फाकुवेति ख्यातो दौलोत्सवः, दीपान्वितेति ख्यातो देवाली-उत्सवः, श्रीकृष्णजन्माष्टमी चेति। निर्दिष्टतिथिषु आयोजनीयेषु एषु अनुष्ठानेषु दुर्गोत्सवः, दौलोत्सवः, देवाली उत्सव एव प्रायः सार्वजनिकतया, बाहुल्येन महतोत्साहेन च पालिता भवन्ति। 'नामनि' असमस्य मनसापूजा, कामाख्याधाम्नः अम्वुवाचीमेला शुवालकुछिप्रभृतिस्थानानामशोकाष्टमी मेला, अन्यानि च गोष्ठीभेदेन पालितानि स्थानीयानुष्ठानानि असमराज्यस्य धर्मीयसंस्कृतेर्निदर्शनानि सन्ति।

असमीयाजनानामनुष्ठानानि उत्सवा वा चतुर्विधा इति वक्तुं शक्तन्ते- कृषिसम्बद्धाः, धर्मसम्बद्धाः, जीवनसम्बद्धाः राजकीया वा। पूर्वोक्तबिहुभठेलिप्रभृतयो मूलतः कृषिसम्बन्धेन, शिवरात्रिदुर्गापूजादयो धर्मसम्बन्धेन आयान्ति। जातसंस्काराः जीवनसम्बन्धेन तिष्ठन्ति, स्वाधीनतादिवसः, गणतन्त्रदिवसो वा आधुनिककालीयो राजकीयोत्सवः। असमीयामुछलमानजनैः, पालिता 'इद' 'महरम' प्रभृत्योत्सवाः, असमीयाख्रीष्टधर्मावलम्बिभिः, पालिता 'ख्रीष्टमास' (वरदिन) प्रभृत्युत्सवा अपि असमीयासंस्कृतेरंशाविशेषा एव। 'ज्योतिसङ्गीतम्', 'राभासङ्गीतम्', 'भूपेन्द्रसङ्गीतम्' इत्येवं ख्यातिं गतानि असमीयाऽऽधुनिकगीतानि असमीयासंस्कृतिं सर्वथा परिषुष्णन्ति। विभिन्ननूतनोपादानैः परिपोषणं लभमाना सैषाऽसमीयासंस्कृतिराधुनिककालेऽपि समधिकतया विकासं लभते।

॥॥

४

# प्रदूषणसमस्या

ड॰ अपूर्व चन्द्र बरठाकुरीया

पृथिव्या भूभागो जलभागो वायुमण्डलञ्च यदा अशुद्धानां पदार्थानां संयोगाद् दूषितानि भवन्ति तदा तदेव प्रदूषणमुच्यते। आधुनिकयुगे प्रदूषणसमस्या जगतो महती समस्या सञ्जायते। विज्ञानस्यापप्रयोगस्तथा लोकानां समाजसचेतनताया अभावः प्रदूषणस्य प्रधाने कारणे भवतः। प्रदूषणद्वारा न केवलं लोकानां स्वास्थ्यहानिः भवति, अपि तु दुरारोग्या व्याधयोऽपि जायन्ते। क्वचित् क्वचित् जलादीनां प्रदूषणं प्राणिनाम् अपमरणमपि जनयति।

**भूभागस्य प्रदूषणम् :**

पृथिव्या भूभागस्य बहुधा प्रदूषणं भवितुमर्हति, प्राचीनकालादेव भारतीयैः ज्ञानिजनैरेतद् विषये चिन्ता क्रियते। प्राचीनकालेऽपि लोकानाम् उपयुक्तशिक्षाऽभावात् भूभागाः जलादयश्च प्रदूषिता अभवन्। अत एव शास्त्रेषु शस्यक्षेत्रे गोष्ठौ, पर्वतस्योपरि नद्यादिषु च मलत्यागः मूत्रत्यागो वा निवारितो भवति। अन्यथा भूभागो जलभागश्च प्रदूषितौ भवेताम्। आधुनिकयुगेऽपि बहुषु स्थानेषु जनैर्यत्र तत्र मलादित्यागः क्रियते। तेन रोगाणां प्रादुर्भावो भवति।

वर्तमानकाले भारतवर्षेषु अन्यदेशेषु च विज्ञानस्य बहुधा प्रयोगो भवति। सर्वत्र कीटनाशकानां द्रव्यानाम् अधिकप्रयोगात् न केवलं शस्यान्येव दूषितानि भवन्ति अपि तु भूमिभागस्यापि महती क्षतिर्जायते। अत एवाभिज्ञैर्जनैः कृषकेभ्य उपयुक्ता शिक्षा प्रदेया, येनेदृशी क्षतिर्न स्यात्।



आधुनिकयुगे रासायनिकपदार्थानाम् अधिकः प्रयोगो भवति, यन्त्रप्रधानेषु देशेषु, यान्त्रिकानां शिल्पक्षेत्राणां बाहुल्यं दृश्यते। तेभ्यो बहवो रासायनिकपदार्था आवर्जनाश्च निर्गच्छन्ति। तेषाम् अधिकारिणः कर्मचारिणश्च तत् सर्वं यत्र तत्र निपतन्ति। तेन च भूमिभागस्य महती क्षतिर्जायते। एतेषु पदार्थेषु प्लाष्टिकप्रभृतयो भूमिभागस्य विशेषत्वेन क्षतिकारका भवन्ति।

नगरेषु जलनिर्गमनाय कुल्यानि भवन्ति। यत्र पौरनियमाः शिथिलाः, तत्र कुल्यशोधकाः कुल्यानि परिष्कृत्य अशुद्धपदार्थान् यत्र तत्र स्थापयन्ति। तेन च भूप्रदूषणं जायते; लोकानां स्वास्थ्यहानिरपि। ईदृशानां प्रदूषणानां निराकरणाय सर्वकाराः समानचिन्तकाश्च यत्नं कुर्युः। ते जनमध्ये समाजचेतनां जनयेयुः येन प्रदूषणं निवारितं भवेत्।

**जलप्रदुषणम् :**

भूमिप्रदूषणम् इव जलप्रदूषणमपि वर्तमानयुगे पृथिव्या महती समस्या जायते। जलप्रदूषणं त्रिप्रकारं भवितुमर्हति जलाशयप्रदूषणं, नदीजलप्रदूषणं सागरजलप्रदूषणञ्च। जलाशयस्य समीपे जले वा मलमूत्रादीनां त्यागेन जलं प्रदूषितं भवति। अशुद्धानां पदार्थानां जले निक्षेपाद्वा जलाशये जलप्रदूषणं जायते। मृतजन्तूनां प्रक्षेपणाद् तज्जलम् अधिकतरं प्रदूषितं जायते। आधुनिकयुगे बहुषु स्थानेषु जलाशयस्य समीपे शिल्पगृहाणि निर्मितानि भवन्ति। ततः क्षतिकराः रासायनिकपदार्थाः निर्गत्य जले पतन्ति। तदा जलाशयस्य जलं विषाक्तं भवति। तेन मत्स्यादीनां रोगा भवन्ति, मृत्युरपि जायते। विषाक्त जलस्य मत्स्यभक्षणेन नरा अपि रोगग्रस्ता भवितुम् अर्हन्ति।

आधुनिकयुगे नदीजलस्य प्रदूषणम् प्रबलां समस्यां जनयति। न केवलं भारतवर्षेषु अपि तु पाश्चात्यदेशेष्वपि इयमेका अतिगभीरा समस्या। ईलण्डदेशे थेमस् नद्या जलं बहुधा प्रदूषितं भवति। इदं टि. एस् इलियट्महोदयेन स्वग्रन्थे उल्लिखितमस्ति। भारतवर्षेषु गङ्गानदी अतिपवित्रा मन्यते। वर्तमानकाले सापि दूषिता जायते। ये नदीतीरे निवसन्ति ते गङ्गाया जलराशिं सर्वथा दूषितं कुर्वन्ति। ते सकलानि अशुद्धवस्तूनि गङ्गाजले निक्षिपन्ति। विशेषतः मृतानां लोकानां शवान् गङ्गाजले एव बहवो जना प्रक्षिपन्ति। ते न जानन्ति यदनेन जलस्य प्रदूषणं वर्धते। अधुना गङ्गाजलस्य शोधनाय तत्रत्येन सर्वकारेण काचिद् योजना गृहीता भवति, यदि सा सफला स्यात्

तदा गङ्गा प्रदूषणमुक्ता भविता। असमप्रदेशो ब्रह्मपुत्रस्य भरलुनद्याश्च एका एव दशा जायते। नदीनां जलं न केवलं मलमूत्रादिभिरशुद्धैः पदार्थैरेव प्रदूषितं भवति। ततोऽपि भयानकः नदीजले रासायनिकपदार्थानां प्रवेशः। इमे पदार्थाः जलभागं सर्वथा विषाक्तं कुर्वन्ति। अनेन जनानां स्वास्थ्यहानिः स्यात्। अपि च बहवो रोगा अपि उत्पद्यन्ते। साम्प्रतिककाले अन्ध्रप्रदेशे मालाधाडुग्रामें नद्या विषाक्तं जलं पीत्वा बहुसंख्यका गावोऽजीर्णतारोगेऽम्रियन्त। गङ्गातीरे कावेरीतीरे च बहूनि शिल्पक्षेत्राणि स्थापितानि भवन्ति। तत्र विषाक्तः रासायनिकः पदार्थसमूहः तेन नदीजलं प्रदूषितं जायते। अधुना स्थानविशेषे गङ्गाया जलपानेन तत्कालमेव मृत्युर्भवति। असमप्रदेशे गुवाहाटी तैलशोधनागारस्य आवर्जनासमूहो भरलुनद्यां विसर्जितो भवति। तेन तज्जलं सर्वथा कलुषितं जायते। मथुरादि नगरेषु यमुनादीनां नदीनां सैव दशा जाता।

जलशयस्य नदीजलस्य वा प्रदूषणनिवारणे सर्वकारस्य यत्नः, लोकानां स्वास्थ्यचेतना चावश्यकी। किन्तु शिल्पप्रभूनाम् अनीहा प्रदूषणनिराकरणे प्रधानोऽन्तरायः। तेषां सहयोगः सर्वदा प्रयोजनीयः। नोचेत् कियतां लोकानां महत् अनिष्टं भविष्यति। समुद्रजलस्य प्रदूषणम् आधुनिककालेऽपरा महती समस्या। यैः पदार्थैर्नदीजलं प्रदूषितं भवति, तैरेव समुद्रजलमपि। किन्तु समुद्रे ततोऽपि भयावहा घटना घटति, आमेरिकाप्रभृतयः देशाः समुद्रजले तेजस्क्रियपदार्थान् निक्षिपन्ति। तस्मात् जलजन्तूनां प्राणानाशो भवति। जलानां प्रदूषणात् कालेन लोकानामपि क्षतिर्भवति।

**बायुप्रदूषणम् :** अधुना सर्वेषु देशेषु शिल्पक्षेत्राणां बाहुल्यं दृश्यते। शिल्पक्षेत्रेभ्योऽतिमात्रं धूमादिकं निर्गत्य वायुमण्डलं दूषयति। वाहनादिभ्योऽपि धूमा निर्गत्य बायुप्रदूषणं जनयति। बायुप्रदूषणं लोकानां स्वास्थ्यहानिं करोति। कफादीनां रोगाणां प्रादुर्भावः प्रायेण बायुप्रदूषणाद् भवति। शिल्पक्षेत्राणां कारणाद् वायुमण्डलम् अतिमात्रं प्रभावितं भवति। अनेन ओजनस्य (ozone) स्तरः स्फोटितो जायते। तेन छिद्रेण सूर्यमण्डलात् क्षतिकारका रश्मय अधिकमात्रया पृथिवीं प्रविशान्ति। अनेन बहुविधा व्याधय उत्पद्यन्ते। वायुमण्डलस्य प्रदूषणात् क्रमेण पृथिव्या उत्तापोऽपि वर्धते। एतत् प्राणिनां कृते महान् चिन्ताविषयो जायते।

शब्दप्रदूषणं वायुप्रदूषणस्यापरो विषयः। वर्तमानयुगे यान्त्रिकवाहनानां



प्रादुर्भावः परिलक्ष्यते। तेन प्रतिदिनं शब्दस्याधिक्यमपि अनुभूयते। शब्दस्याधिक्यमपि वायुप्रदूषणस्य कारणम्। अधिकशब्दश्रवणेन लोका उन्मत्ता अपि भवेयुः।

जाम्वु (जेट्) विमानस्य शब्देन हृद्रोगो वर्धत इति प्रायः आलोचितं भवति। तेन शब्दनियन्त्रणं कर्त्तव्यम्।

**प्रदुषणनिरोधस्योपाया :**

प्रदूषणस्य निरोधोऽति कठिनं कर्म। तथापि समाजस्य हितचिन्तकैरेतद् विषये यत्नः कर्त्तव्यः।

भूमिभागस्य प्रदूषणनिरोधाय एते उपाया ग्रहणीयाः–

(क) यत्र तत्र अपकारिणां वस्तूनां निक्षेपो न करणीयः

(ख) कीटनाशकद्रव्यानां प्रयोगविषये सावधानता अवलम्बनीया।

(ग) लोकानां मध्ये सर्वकारेण समाजचिन्तकैश्च स्वास्थ्यचेतना उद्दीपनीया।

(घ) भूभागस्य हानिकारका पदार्था अन्यत्र स्थापनीया नाशानीया वा।

**जलप्रदूषणस्य निरोध :**

जलप्रदूषणस्य निरोधाय इमे व्यवस्था ग्रहणीयाः

(क) जलदूषकाः पदार्थाः जले न क्षेपणीया। तदर्थमपि जनचेतना आवश्यकी।

(ख) शिल्पक्षेत्राणि नदीतः दूरे स्थापनीया।

(ग) रासायनिक पदार्थाः यथा जले न पतन्ति तदर्थं व्यवस्था ग्रहणीया।

(घ) समुद्रजलस्य प्रदूषणनिरोधाय सकलदेशानां सहमतिः प्रयोजनीया।

**वायुप्रदूषणस्य निरोध :**

वायुप्रदूषणस्य निरोधः अतीव कठिनं कर्म। वर्तमानसमये बहुषु, नगरेषु वाहनानां धूमा नियन्त्रिता भवन्ति। शिल्पक्षेत्रेभ्यो यत्प्रदूषणं जायते, तस्य निरोधाय विधिविशेषः कर्तव्यः। किन्तु तत्रापि देशानां सहयोगः आवश्यकीयः।

शब्दप्रदूषणस्य निरोधेऽपि विधिविशेषाः प्रयोजनीया। किन्तु वैज्ञानिकानां सहायं विना बायुप्रदूषणस्य सफलो निरोधो न सम्भवति।

1 1 1 1

# द्वादशश्रेणीकृते

१

**महाकवि कालिदासविरचिते**

# रघुवंशे

**त्रयोदशः सर्गः।**

अथात्मनः शब्दगुणं गुणज्ञः
पदं विमानेन विगाहमानः।
रत्नाकरं वीक्ष्य मिथः स जायां
रामाभिधानो हरिरित्युवाच॥ १॥

वैदेहि! पश्यमलयात् विभक्तं
मत्सेतुना फेनिलमम्बुराशिम्।
छायापथेनेव शरत्प्रसन्नम्
आकाशमाविष्कृत चारुतारम्॥ २॥

गुरोर्यियक्षोः कपिलेन मेध्ये
रसातलं संक्रमिते तुरङ्गे।
तदर्थमुर्वीमवदारयद्भिः
पूर्वैः किलायं परिवर्द्धितो नः॥ ३॥



गर्भं दधत्यर्कमरीचयोऽस्मात्
विवृद्धिमत्राश्नुवते वसूनि।
अविन्धनं वह्निमसौ बिभर्त्ति
प्रह्लादनं ज्योतिरजन्यनेन॥ ४॥

तां तामवस्थां प्रतिपद्यमानं
स्थितं दश व्याप्य दिशो महिम्ना।
विष्णोरिवास्यानवधारणीयम्
ईदृक्तया रूपमियत्तया वा॥ ५॥

नाभिप्ररूढाम्बुरुहासनेन
संस्तूयमानः प्रथमेन धात्रा।
अमुं युगान्तोचितयोगनिद्रः
संहृत्य लोकान् पुरुषोऽधिशेते॥ ६॥

पक्षच्छिदा गोत्रभिदात्तगन्धाः
शरण्यमेनं शतशो महीध्राः।
नृपा इवोपप्लविनः परेभ्यो
धर्मोत्तरं मध्यममाश्रयन्ते॥ ७॥

रसातलादादिभवेन पुंसा
भुवः प्रयुक्तोद्वहनक्रियायाः।
अस्याच्छमम्भः प्रलयप्रवृद्धं
मुहूर्तवक्त्राभरणं बभूव॥ ८॥

मुखार्पणेषु प्रकृतिप्रगल्भाः
स्वयं तरङ्गाधरदानदक्षः।
अनन्यसामान्यकलत्रवृत्तिः
पिवत्यसौ पाययति च सिन्धुः॥ ९॥

ससत्वमादाय नदीमुखाम्भः
संमीलयन्तो विवृताननत्वात्।
अमी शिरोभिस्तिमयः सरन्ध्रै-
रूर्ध्वं वितन्वन्ति जलप्रवाहान्॥ १०॥

मातङ्गनक्रैः सहसोत्पतद्भि-
र्भिन्नान् द्विधा पश्य समुद्रफेनान्।
कपोलसंसर्पितया य एषां
व्रजन्ति कर्णक्षणचामरत्वम्॥ ११॥

वेलानिलाय प्रसृता भुजङ्गाः
महोर्मिविस्फूर्जथुनिर्विशोषाः।
सूर्य्यांशुसम्पर्कसमृद्धरागै–
र्व्यज्यन्त एते मणिभिः फणस्थैः॥ १२॥

तवाधरस्पर्द्धिषु विद्रुमेषु
पर्य्यस्तमेतत् सहसोर्मिवेगात्।
ऊर्ध्वाङ्कुरप्रोतमुखं कथञ्चित्
क्लेशादपक्रामति शङ्खयूथम्॥ १३॥

प्रवृत्तमात्रेण पयांसि पातुम्
आवर्त्तवेगाद् भ्रमता घनेन।
आभाति भूयिष्ठमयं समुद्रः
प्रमथ्यमानो गिरिणेव भूयः॥ १४॥

दूरादयश्चक्रनिभस्य तन्वी
तमालतालीवनराजिनीला।
आभाति वेला लवणाम्बुराशेः
धारानिबद्धेव कलङ्करेखा॥ १५॥



वेलानिलः केतकरेणुभिस्ते
संम्भावयत्याननमायताक्षि!
मामक्षमं मण्डनकालहाने–
र्वेत्तीव विम्बाधरबद्धतृष्णाम्॥ १६॥

एते वयं सैकतभिन्नशुक्ति–
पर्यस्तमुक्तापटलं पयोधेः।
प्राप्ता मुहूर्तेन विमानवेगात्
कूलं फलावर्जितपूगमालम्॥ १७॥

कुरुष्व तावत् करभोरु! पश्चात्
मार्गे मृगप्रेक्षिणि! दृष्टिपातम्।
एषा विदूरीभवतः समुद्रात्
सकानना निष्पततीव भूमिः॥ १८॥

क्वचित्पथा संचरते सुराणां
क्वचिद् घनानां पततां क्वचिच्च।
यथाविधो मे मनसोऽभिलाषः
प्रवर्त्तते पश्य तथा विमानम्॥ १९॥

असौ महेन्द्रद्विपदानगन्धि-
स्त्रिमार्गगावीचिविमर्दशीतः।
आकाशवायुर्दिनयौवनोत्थान्
आचामति स्वेदलवान् मुखे ते॥ २०॥

करेण वाातायनलम्बितेन
स्पृष्टस्त्वया चण्डि! कुतूहलिन्या।
आमुञ्चतीवाभरणं द्वितीयम्
उद्भिन्नविद्युद्वलयो घनस्ते॥ २१॥

अमी जनस्थानमपोढ़विघ्नं
मत्वा समारब्धनवोटजानि
अध्यासते चीरभृतो यथास्वं
चिरोज्झितान्याश्रममण्डलानि॥ २२॥

सैषा स्थली यत्र विचिन्वता त्वां
भ्रष्टं मया नूपुरमेकमुर्व्याम्।
अदृश्यत त्वच्चरणारविन्द-
विशलेषदुःखादिव बद्धमौनम्॥ २३॥

त्व रक्षसा भीरु! यतोऽपनीता
तं मार्गमेताः कृपया लता मे।
अदर्शयन् वक्तुमशक्नुवन्त्यः
शाखाभिरावर्जितपल्लवाभिः॥ २४॥

मृग्यश्च दर्भाङ्कुरनिर्व्यपेक्षा-
स्तवागतिज्ञं समबोधयन् माम्।
व्यापारयन्त्यो दिशि दक्षिणस्याम्
उत्पक्ष्मराजीनि विलोचनानि॥ २५॥

एतङ्गिरेर्माल्यवतः पुरस्तात्
आविर्भवत्यम्बरलेखि शृङ्गम्।
नवं पयो यत्र घनैर्मया च
त्वद्विप्रयोगाश्रु समं विसृष्टम्॥ २६॥

गन्धश्च धाराहतपल्वलानां
कादाम्बमर्द्धोद्गतकेसरञ्च।
स्निग्धाश्च केकाः शिखिनां बभूवु-
र्यस्मिन्नसह्यानि विना त्वया मे॥ २७॥



पूर्वानुभूतं स्मरता च यत्र
कम्पोत्तरं भीरु! तवोपगूढम्।
गुहाविसारीण्यतिवाहितानि
मया कथञ्चिद्घनगर्जितानि॥ २८॥

आसारसिक्तक्षितिवाष्पयोगात्
मामक्षिणोद् यत्र विभिन्नकोशैः।
विड़म्बमाना नवकन्दलैस्ते
विवाहधूमारुणलोचनाश्रीः॥ २९॥

उपान्तवानीरवनोपगूढ़ा-
न्यालक्ष्यपारिप्लवसारसानि।
दूरावतीर्णा पिवतीव खेदात्
अमूनि पम्पासलिलानि दृष्टिः॥ ३०॥

अत्रावियुक्तानि रथाङ्गनाम्नाम्
अन्योन्यदत्तोत्पलकेसराणि।
द्वन्द्वानि दूरान्तरवर्त्तिना ते
मया प्रिये! सस्पृहमीक्षितानि॥ ३१॥

इमां तटाशोकलताञ्च तन्वीं
स्तनाभिरामस्तवकाभिनम्राम्।
त्वत्प्राप्तिबुद्ध्या परिरब्धुकामः
सौमित्रिणा साश्रुरहं निषिद्धः॥ ३२॥

अमूर्विमानान्तरलम्बिनीनां
श्रुत्वा स्वनं काञ्चनकिङ्किणीनाम्।
प्रत्युद्व्रजन्तीव खमुत्पतन्त्यो
गोदावरीसारसपङ्क्तयस्त्वाम्॥ ३३॥

एषा त्वया पेशलमध्ययापि
घटाम्बुसंवर्द्धितबालचूता।
आनन्दयत्युन्मुखकृष्णसारा
दृष्टा चिरात् पञ्चवती मनो मे॥ ३४॥

अत्रानुगोदं मृगयानिवृत्त-
स्तरङ्गवातेन विनीतखेदः।
रहस्त्वदुत्सङ्गनिषण्णमूर्द्धा
स्मरामि वानीरगृहेषु सुप्तः॥ ३५॥

भ्रूभेदमात्रेण पदान्मघोनः
प्रभ्रंशयां यो नहुषं चकार।
तस्याविलाम्भः परिशुद्धिहेतो-
र्भौमो मुनेः स्थानपरिग्रहोऽयम्॥ ३६॥

त्रेताग्निधूमाग्रमनिन्द्यकीर्त्ते–
स्तस्येदमाक्रान्तविमानमार्गम्।
घ्रात्वा हविर्गन्धि रजोविमुक्तः
समश्नुते मे लघिमानमात्मा॥ ३७॥

एतन्मुनेर्मानिनि शातकर्णेः
पञ्चास्परो नाम विहारवारि।
आभाति पर्य्यन्तवनं विदूरात्
मेघान्तरालक्ष्यमिवेन्दुविम्बम्॥ ३८॥

पुरा स दर्भाङ्कुरमात्रवृत्ति-
श्चरन् मृगैःसार्द्धमृषिर्मघोना।
समाधिभीतेन किलोपनीतः
पञ्चाप्सरोयौवनकूटबन्धम्॥ ३९॥



तस्यायमन्तर्हितसौधभाजः
प्रसक्तसङ्गीतमृदङ्गघोषः।
वियद्गतः पुष्पकचन्द्रशालाः
क्षणं प्रतिश्रुन्मुखराः करोति॥ ४०॥

हविर्भुजामेधवतां चतुर्णां
मध्ये ललाटन्तपसप्तसप्तिः।
असौ तपस्यत्यपरस्तपस्वी
नाम्ना सुतीक्ष्णश्चरितेन दान्तः॥ ४१॥

अमुं सहासप्रहितेक्षणानि
व्याजार्द्धसन्दर्शितमेखलानि।
नालं विकर्त्तुं जनितेन्द्रशङ्कं
सुराङ्गनाविभ्रमचेष्टितानि॥ ४२॥

एषोऽक्षमालावलयं मृगाणां
कण्डूयितारं कुशसूचिलावम्।
सभाजने मे भुजमूर्द्धबाहुः
सव्येतरं प्राध्वमितः प्रयुङ्क्ते॥ ४३॥

वाचंयमत्वात् प्रणतिं ममैषः
कम्पेन किञ्चित् प्रतिगृह्य मूर्ध्नः।
दृष्टिं विमानव्यवधानमुक्तां
पुनः सहस्रार्च्चिषि सन्निधन्ते॥ ४४॥

अदः शरण्यं शरभङ्गनाम्न-
स्तपोवनं पावनमाहिताग्नेः।
चिराय सन्तर्प्य समिद्भिरग्निं
यो मन्त्रपूतां तनुमप्यहौषीत्॥ ४५॥

छायाविनीताध्वपरिश्रमेषु
भूयिष्ठसम्भाव्यफलेष्वमीषु।
तस्यातिथीनामधुना सपर्य्या
स्थिता सुपुत्रेष्विव पादपेषु॥ ४६॥

धारास्वनोद्गारिदरीमुखोऽसौ
शृङ्गाग्रलग्नाम्बुदवप्रपङ्कः।
बध्नाति मे बन्धुरगात्रि! चक्षु–
र्दृप्तः ककुद्मानिव चित्रकूटः॥ ४७॥

एषा प्रसन्नस्तिमितप्रवाहा
सरिद्विदूरान्तरभावतन्वी।
मन्दाकिनी भाति नगोपकण्ठे
मुक्तावली कण्ठगतेव भूमेः॥ ४८॥

अयं सुजातोऽनुगिरं तमालः
प्रबालमादाय सुगन्धि यस्य।
यवाङ्कुरापाण्डुकपोलशोभी
मयवतंसः परिकल्पितस्ते॥ ४९॥

अनिग्रहत्रासविनीतसत्व–
मपुष्पलिङ्गात् फलवन्धिवृक्षम्।
वनं तपःसाधनमेतदत्रे–
राविष्कृतोदग्रतरप्रभावम्॥ ५०॥

अत्राभिषेकाय तपोधनानां
सप्तर्षिहस्तोद्धृतहेमपद्माम्।
प्रवर्त्तयामास किलानुसूया
त्रिस्त्रोतसं त्र्यम्वकमौलिमालाम्॥ ५१॥



वीरासनैर्ध्यानजुषामृषीणा–
ममी समध्यासितवेदिमध्याः।
निवातनिष्कम्पतया विभान्ति
योगाधिरुढ़ा इव शाखिनोऽपि॥ ५२॥

त्वया पुरस्तादुपयाचितो यः
सोऽयं वटः श्याम इति प्रतीतः।
राशिर्मणीनामिव गारुड़ानां
सपद्मरागः फलितो विभाति॥ ५३॥

क्वचित् प्रभालेपिभिरिन्द्रनीलै–
र्मुक्तामयी यष्टिरिवानुविद्धा।
अन्यत्र माला सितपङ्कजाना–
मिन्दीवरैरुत्खचितान्तरेव॥ ५४॥

क्वचित् खगानां प्रियमानसानां
कादम्बसंसर्गवतीव पङ्क्तिः।
अन्यत्र कालागुरुदत्तपत्रा
भक्तिर्भुवश्चन्दनकल्पितेव॥ ५५॥

क्वचित् प्रभाचान्द्रमसी तमोभि–
श्छायाविलीनैः शवलीकृतेव।
अन्यत्र शुभ्रा शरदभ्रलेखा
रन्ध्रेष्विवालक्ष्यनभःप्रदेशा॥ ५६॥

क्वचिच्च कृष्णोरगभूषणेव
भस्माङ्गरागा तनुरीश्वरस्य।
पश्यानवद्याङ्गि! विभाति गङ्गा
भिन्नप्रवाहा यमुनातरङ्गैः॥ ५७॥

1 1 1 1

# Raghuvamsam
# Canto. XIII

# रघुवंशे

## (त्रयोदशः सर्गः)

---

## Introduction :

The Author :

The poet Kalidasa is the greatest of all the poets of India. He has earned brilliant fame all over the world for his literary genius. It is said that the poet was dull and foolish during the first part of his life; but, at the grace of Goddess Kali, he was endowed with the spirit of literary genius.

It is not certainly known where the poet was born. Opinions of scholars dif fer with regard to his birth place. It is popular that the poet belonged to Ujjayini. His date is also controversial and as such, no fixed date can be assigned to him. However, we find Banabhatta mentioning him in his Harsacaritam. Therefore, it seems that Kalidasa preceeds Banabhatta. The Aihole Inscription dated 634 A.D., also



mentions Kalidasa. As such, it may be said that the poet flourished before the middle of the 5th century A.D.

Kalidasa's style is very lucid. It is seen that the poet prefers वैदर्भी style for his poetic composition. The character of this style is defined as under-

माधुर्य्य-व्यञ्जकैर्वर्णैः रचना ललितात्मिका।
अवृत्तिरल्पवृत्तिर्वा बैदर्भी रीतिरिष्यते॥

Kalidasa has handled Upama in his poems with an adapt hand. Hence it is called "उपमा कालिदासस्य."

In the seclected text, the poet has nicely used Upama in verses numbering 38, 46, 47, 48, 53 and Malopama in the description of the confluence of the Ganges and the Y amuna- from verses 54-57. Besides, Upama, he has utilised his poetic talent in using other figures of speeches like उत्पेक्षा in verses 52, 23, 15; Smarana in verse 29. Bhrantiman in the verse 32, Kavyalinga in verse 37 and the Rupaka in verse 39. The verse no. 2 in Upama and the verse 15 in उत्प्रेक्षा are very brilliant in description so far their lucid words and senses are concerned.

Kalidasa's works :

The poet Kalidasa wrote three dramas-viz- the Abhijnanasakuntalam, the V ikramorvasiyam and the Malavikagnimitram.

Kalidasa composed two mahakavyas - viz - the Raghuvamsam and the Kumarasambhavam.

He composed two khandakavyas, viz- the Meghadutam and the Rtusamharam.

Besides these dramas and kavyas, it is stated, Kalidasa composed some other kavyas. Some of them are given below-

Nalodaya, Puspavanavilasa, Srngaratilaka, Srutabodha, Kuntesvaradautya, Shyamantadandaka, Setubandha, Ambastava, Makarandastava, Navaratnamala etc.

## Reference to the selected text and contents of the verses-

The Raghuvamsam in nineteen cantoes, describes the lives of twentynine kings of Raghu dynasty. King Dilipa, the son of Manu, is the first king of the solar race and Agnivarna is the last. The famous king of this race are Dilipa, Raghu, Aja, Dasaratha, Rama, Kusa and Lava.

### The Present text :

The verses 1 - 57 are adopted from the canto XIII of the Raghuvamsam. This canto is called Dandakapratyagamana (दण्डकाप्रत्यागमन). However, the entire canto consisting of 79 verses is not selected here. The text being up to the confluence of the Ganges and Yamuna, presents beautifully the ocean, hermitages of different sages and natural sights that Rama beheld from above while returning from Lanka to Ayodhya with Sita.

The contents of the verses of the selected text are given below for the benefit of the students.



### Contents of the verses

Rama, on seeing the ocean from the aerial car, begins to speak to Sita in verse 1. The description of the ocean starts from verse 2. Rama tells how the ocean become so vast in verse 3. The 4th verse states that the ocean bears fire under its water.

The 5th verse states that the form of the ocean undergoing different changes is beyond our imagination.

The greatness of the ocean is found in verses 6 and 7. It is described with poetic fancy in verses 8 and 9.

The description of the movement of whales and other big aquatic creatures is presented in verses 10 and 11.

The narration of the beauty of the long snakes moving on the sea-shore is found in verse no. 12. The 13th verse gives the description of the conch-shell.

The 14th verse states that the cloud touching the ocean to drink from it, is made round by the force of the whirlpool. The description of the shore with Tala and Tamala tress and the gentle breeze blowing on the shore is found in verses 15 and 16. The shore with the forest land is presented in verses 17 and 18.

The 19th verse states that the Puspaka chariot moves according to Rama's desire. The cool breeze of the sky soothing Sita's face is found in verse 20.

Sita stretched out her hand through the window of the chariot in verse 21.

The ascetics are occupying their abandoned cottages again feeling it safe to live in those places in verse 22.

Rama pointed to Sita the spot where he found the anklet while he was searching her. Rama further tells Sita how the path was directed to him by creepers even in verses 23 and 24. The poet depicts as to how showing him the path (verse 25). The description of the Malyavan mountain as in verse 26.

As Sita was not with Rama, the sweet smell of the pools in the rainy season, the smell of the Kadamba flowers and the screams of peacocks made him anxious (verse 27). Verses 28 and 29 describe the pangs of seperation of Rama from Sita.

The lake Pampa is described in the verse 30. How Sita was remembered by Rama on seeing various sight is described in verses 31 and 32. After the description of the Godavari in the verse 33, the Panchavati is presented with sweet memory of the happenings during their stay at this forest in verses 34 and 35. The verse 36 contains the description of the sage Agastya and the sight of the hermitage in verse 37.

The pleasure-lake of Satakarni is described in verses 38, 39 and 40.

The self restrained ascetic Sutiksa is described in 41, 42, 43 and 44 verses.

The site of the sage Sarabhanga and the hospitality in the absence of the ascetic are depicted in verses 45 and 46. The description of the Citrakuta starts from the verse 47 and continues to verse 49.

The verses 50, 51 and 52 give a pleasant description of



the hermitage of the sage Atri. The Banyan tree called Shyama is described in 53rd verse.

The charming description of the confluence of the Ganges and Yamuna starts from the verse 54 and ends in the verse 57.

The metres used by the poet in the text–

The first verse is composed in उपजाति metre. It is generally a combination of इन्दवज्रा and उपेन्द्रज्रा.

The इन्द्रवज्रा is defined as- "स्यादिन्द्रवज्रा यदि तौ जगौ गः" ie. when the quarters are composed with त, त and ज triads with the last two syllables being heavy (guru), it is called इन्द्रवज्रा.

The उपेन्द्रवज्रा is defined as "उपेन्द्रवज्रा ज-त-जाश्चा गौ स्यात्" i.e. when the triads ज, त, ज are there in quarters with last two syllables being long, it is called उपेन्द्रवज्रा.

The second verse is in इन्द्रवज्रा metre. The verses from the 3rd to the 57th are in the उपजाति metre.

# Notes :

Sl. 1. अथ is a indeclinable used to mean hereafter.

आत्मन् used to mean Rama by identifying him with Lord Visnu.

पदम् is used to mean the sky.

शब्दगुणन् used as an adjective to शब्द (sound) is the quality of the sky.

गुणज्ञ = गुण - Öज्ञा + क + सु (पुं)।

मिथः = रहसि, एकान्ते, in secret.

उवाच = वच् + लिट् अ

Sl. 2. वैदेहि = विदेहस्यापत्यमिति विदेह + अण् + ङीप्;सम्बोधने प्रथमाया एकवचने। आमलयात् = आङ्मर्यादाभिविध्यः इति पञ्चमी। मत्सेतुना = **करणे तृतीया (कर्त्तृकरणयोस्तृतीया)** students have to understand that which principally helps to accomplish some deed or act is called करण (साधकतमं करम्), फेनिलम् = फेन + इलच् It is an adjective to अम्बुराशिम् in Accusitive Case (कर्मकारक). The bridge over the ocean is compared to the galaxy in the sky. Hence मत्सेतुना is उपमेय and छायापथेन is उपमान् and इव is the expressive word. As the milky way divides the Autumnal sky, the bridge constructed by Rama at the time of crossing ocean to invade the capital of Ravana for regaining Sita, divides the ocean which resembles the autumnal sky in the sense the forms of water shone like stars when the sun rays fell on them. Here the figure of speech is उपमा which is defined as साम्यं वाच्यमवैधर्म्यं वाक्यैक्य उपमाद्वयोः

Sl. 3. यियक्षोः = यज् + सन् + उ + ङस्। गुरोः = शेषे षष्ठी। गुरु is used by the poet to mean the revered forefather



of Rama's lineage. संक्रमिते तुरगे = भावे सप्तमी by the- यस्य च भावेन भावलक्षणम्। अवदारयद्भिः, पूर्वैः = **अनुक्ते कर्त्तरि तृतीया** by the- **कर्त्तृकरणयोस्तृतीया।** Herein this verse, Rama is telling Sita how that ocean came into existence. Here is a legend relating with the digging of earth by the ancestors of Rama. King Sagara performed Aswamedha Sacrifice. He had sixty thousand sons when the horse of the sacrifice was stolen and fastened to a post by Indra very near the place of Kapila's penance in the nether region, the sons of Sagara began digging the earth in search of the horse. At last they found the horse near the sage Kapila. The sons of Sagara thought that the sage stole the horse and as such, they abused the sage. At this, the sage enraged at them and burnt them into ashes out of wrath. Bhagiratha entreated the sage who told him that if he could bring the celestial Ganges to the Earth, then his forefathers would be released and liberated from the bondage of worldly deeds. Thereafter. Bhagiratha engaged in penance and satisfied the Ganges and brought her down to the Earth. This is how the ocean came into existence.

Sl. 4. अर्कमरीचयः the rays of the Sun. वसूनि = रत्नानि, धनानि धने रत्ने बसु स्मृतम् इति विश्वः। Here, it is stated that the ocean contains fire underneath the water. It is

वाड़वानल। प्रह्लादनं ज्योतिः the radiant light of the moon. It refers to the coming out of the moon at the time of churning the ocean by the gods.

Sl. 5. तां ताम्- the reduplication means अनेकाम् (many). Here the different states of the ocean are pointed out. For this reason, the ocean is compared to Lord Vishnu who assumes different forms. प्रतिपद्यमानम् = प्रति-पद् + शानच् + सु (क्लीव) adjective to रूपम्। व्याप्य = वि- आप् + ल्यप्। दिशः = "कालाध्यनोरत्यन्तसंयोगे" इति द्वितीया। महिम्ना = महत् + इमनिच् + टा। करणे तृतीया। विष्णोः = शेषे षष्ठी। इदृक्तया = प्रकृत्यादिभ्यस्तृतीया। अनवधारणीयम् = न अवधारणीयम इति नञ् तत्पुरुषः। अव- धृ + अनीय + सु (क्लीव), adjective to रूपम्।

Sl. 6. अमुम्- "अधिशीङ्स्थासां कर्म" इति द्वितीया।

धात्रा- "कर्तृकरणयोस्तृतीया" इति तृतीया।

अम्बुरुह- पद्मम् lotus; अम्बु-रुह् + क

संस्तूयमानः- सम्- स्तु + शानच् + सु, adjective to पुरुषः

पुरुषः- कर्त्तरि प्रथमा; here Lord Vishnu is meant "क्षेत्रज्ञ आत्मा पुरुषः" इत्यमरः।

संहृत्य = सम्- हृ + ल्यप्

युगान्तोचितयोगनिद्रः- adjective to पुरुषः।

युगानाम् अन्तः इति षष्ठी तत्पुरुषः, युगान्ते उचिता युगान्तोचिता इति सप्तमी तप्तुरुषः, युगान्तोचिता योगनिद्रा यस्य स इति बहुब्रीहिः, योग एव निद्रा इति कर्मधारयः।

Sl. 7. पक्षच्छिदा- अनुक्तेकर्त्तरि तृतीया, an adjective to



गोत्रभिदा। पक्ष-छिद् + क्विप् + टा; पक्षान् छिनत्ति इति उपपद तत्पुरुषः।

गोत्रभिदा- गोत्र-भिद् + क्विप् + टा;

अनुक्ते कर्त्तरि तृतीया।

गोत्रान् भिनत्ति इति उपपद तत्पुरुषः

महीध्राः- पर्वताः

परेभ्यः- 'भीत्रार्थानां भयहेतुः' इति पञ्चमी।

धर्म्मोत्तरम्- धर्मः उत्तरः यस्य, तम् इति बहुब्रीहिः

Here the figure of speech is उपमा।

Sl. 8. अम्भः- जलम्, आपः (अम्भस् is स-कारान्त neuter) अम्भः has two adjective in the verse, one being अच्छम् meaning स्वच्छम् and the other being प्रलयप्रबद्धम्।

बभूव = भू + लिट् ज।

पुंसा = पुरुषेण। अनुक्ते कर्त्तरि तृतीया इति तृतीया विभक्तिः।

भुवः- शेषे षष्ठी इति षष्ठी

वक्त्रावरणम्- has another reading वक्त्राभरणम्। But वक्त्रावरणम् is more pleasing in this case.

Sl. 9. पाययते- पा + णिच्- लट् ते, "णिचञ्च" इति सूत्रवलाद् आत्मनेपदम्।

प्रकृतिप्रगल्भा- an adjective to सिन्धुः in Accusivive plural. प्रकृत्या प्रगल्भा इति तृतीया तत्पुरुषः।

तरङ्गाधरदानदक्षः an adjective to असौ। तरङ्ग एव अधरः इति रूपक कर्मधारयः, तस्य दानम् इति षष्ठी तत्पुरुषः,

तस्मिन् दक्षः इति सप्तमी तत्पुरुषः।

अनन्यसामान्यकलत्रवृत्तिः- an adjective to असौ,

अन्येषां सामान्या अन्यसामान्या इति षष्ठी तत्पुरुषः, न अन्यसामान्या अनन्यसामान्या इति नञ्तत्पुरुषः, कलत्रेषु वृत्तिः इति कलत्रवृत्तिः इति सप्तामी तत्पुरुषः। अनन्यसामान्या कलत्रवृत्तिः यस्य स इति बहुब्रीहिः।

Sl. 10. ससत्त्वम्- an adjective to नदीमुखाम्भः, सत्त्वैः सह वर्तते यः इति बहुब्रीहिः, तम्।

आदाय-आ दा + ल्यप्।

नदीमुखाम्भः- कर्मणि द्वितीया इति द्वितीया।

नद्याः मुखम् इति षष्ठी तत्पुरुषः, तस्य अम्भः इति षष्ठी तत्पुरुषः, तम्।

विवृताननत्वात्- हेतौ पञ्चमी। विवृतानि आननानि येषां ते विवृताननाः इति बहुब्रीहिः, तेषां भावः इति त्व प्रत्ययात् विवृताननत्वम्, तस्मात्।

तिमयः- कर्त्तरि प्रथमा।

शिरोभिः- करणे तृतीया।

सरन्ध्रैः- adjective to शिरोभिः।

जलप्रवाहान्- कर्मणि द्वितीया। जलानां प्रवाहः इति जलप्रवाहाः इति षष्ठी तत्पुरुषः, तान्।

Sl. 11 उत्पतद्भिः- an adjective to मातङ्गनक्रैः।

मातङ्गनक्रैः- अनुक्ते कर्त्तरि तृतीया, जलगजैः।

सहसा-an indeelinable modifying the word उत्पतद्भिः

सहसा- अतर्किते।

समुद्रफेनान्- समुत्रस्य फेनाः समुद्रफेनाः इति षष्ठी तप्तुरुषः, तान्, कर्मणि द्वितीया।



भिन्नान्- an adjective qualifying समुद्रफेनान्। भिद् + क्त (पुं) + शस्।

कपोलसंसर्पिता- कपोलयोः संसर्पिणः इति सप्तमी तत्पुरुषः, तेषां भावः इति तल योगे कपोलसंसर्पिता, तया इति हेतौ तृतीया।

कर्णक्षणचामरत्वम्- कर्मणि द्वितीया।

चामरस्य भावः चामरत्वम्, क्षणं चामरत्वम् इति द्वितीया तत्पुरुषः, कर्णयोः क्षणचामरत्वम् इति षष्ठी तत्पुरुषः।

Here, the figure of speech is लुप्तोपमा।

Sl. 12. भुजङ्गा- भुज-गम् + ड + जस्। उक्ते कर्मणि प्रथमा। भुजेन गच्छति इति उपपदतत्पुरुषः, ते। सर्पाः, अहयः।

प्रसृताः- an adjective to भुजङ्गाः,

प्र-सृ + क्त + जस् (पुं)।

मणिभिः- अनुक्ते कर्त्तरि तृतीया।

फनस्थैः- adjective to मणिभिः।

फन + स्था + क + भिस्। फनेषु तिष्ठन्ति ये, ते इति उपपदतत्पुरुषः।

वेलानिलाय- वेलायाः अनिलः इति षष्ठी तत्पुरुषः, तस्मै। वेलानिलं पातुम् इत्यर्थः। Here तुमुनान्त word is dropped, the accusative of तुमुनान्त word is governed by चतुर्थी। Hence, चतुर्थी is by the rule क्रियार्थोपपदस्य च कर्मणि स्थानिनः।

सूर्यांशुसम्पर्कसमृद्धरागैः- an adjective to मणिभिः, सूर्यस्य अंशवः इति षष्ठी ततपुरुषः, तेषां सम्पर्कः इति षष्ठी तत्पुरुषः, तेन समृद्धः इति तृतीया तत्पुरुषः, तादृशः रागः येषाम् इति बहुब्रीहिः, तैः।

Here the figure (अलंकार) of speece is सामान्य। It is defined as "सामान्य प्रकृतस्यान्यतादात्म्यं सदृशैर्गुणैः" Here

the waves of the ocean resemble the snakes distinguished by jewels on their heads.

Sl. 13. उर्मिवेगात्- उर्मीणां वेगः षष्ठी तत्पुरुषः, तस्मात्। हेतौ पञ्चमी।

क्लेशात्- ल्यब्लोपे कर्मणि पञ्चमी।

क्लिश् + घञ् + ङसि

विद्रुमेषु- प्रवालेषु

शङ्खयूथम्- शङ्खानां यूथम् इति षष्ठी तत्पुरुषः।

Sl. 14. आवर्तवेगात्- आवर्तस्य वेगः इति षष्ठी तत्पुरुषः, तस्मात्। हेतौ पञ्चमी।

घनेन- हेतौ तृतीया, मेघेन।

भ्रमता- भ्रम् + शतृ + टा adjective to घनेन

भूयिष्ठम्- बहु + इष्ठन् + अम्, क्रियाविशेषणे द्वितीया।

गिरिणा- करणे तृतीया।

भूयः- पुनः, वहु + इयस्।

Sl. 15. दूरात्- हेतौ पञ्चमी।

लवणाम्बुराशेः- शेषे षष्ठी। अम्बूनां राशिः इति षष्ठी तत्पुरुषः। लवणः अम्बुराशिः इति कर्मधारयः, तस्य।

निबद्धा- नि-बन्ध् + कर्मणि क्त + आप्, धारायां निबद्धा इति सप्तमी तत्पुरुषः।

तमालतालीवनराजिनीला- an adjective to वेला, तमालाश्च ताल्यश्च इति तमालताल्यः इति द्वन्द्वसमासः, तमालतालीनां वनानि इति षष्ठी तत्पुरुषः, तेषां राजिः इति षष्ठी तत्पुरुषः, तया नीला इति तृतीया तत्पुरुषः।

The figure (अलंकार) of speech occured in verses 14 and 15 is उत्पेक्षा। It is defined as- "भवेत् सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना।"

Sl. 16. वेलानिलः- वेलायाः अनिलः इति षष्ठी तत्पुरुषः। कर्त्तरि



प्रथमा इति प्रथमा।

केतकरेणुभिः- केतकानां रेणवः इति षष्ठी तत्पुरुषः तैः इति करणे तृतीया।

सम्भावयति- सम्-भू + लट् ति

आयताक्षि- आयते अक्षिणी यस्याः इति बहुब्रीहिः। सम्बोधने प्रथमा।

आननम्- मुखम्।

Sl. 17. पयोधेः- शेषे षष्ठी।

मुहूर्तेण- अपवर्गे तृतीया।

विमानवेगात्- हेतौ पञ्चमी।

कूलम्- कर्मणि द्वितीया।

फलावर्जितपुगामल्- adjective to कूलम्। पुगानां माला इति षष्ठी तत्पुरुषः। फलैः आवर्जिताः इति तृतीया तत्पुरुषः। फलावर्जिता पुगमाला यस्मिन् इति बहुब्रीहिः, तत्।

Sl. 18. करभोरु- सम्बोधने प्रथमा।

मृगप्रेक्षिणि- सम्बोधने प्रथमा।

समुद्रात्- अपादाने पञ्चमी।

सकानना- काननैः सह वर्त्तमाना इति सकाननः, स्त्रियामाप् इति सकानना, adjective to भूमिः।

Sl. 19. सञ्चरते- सम्-चर् + लट् ते। Here चर् is आत्मनेपदी by the rule 'समस्तृतीया युक्तात्।'

घनानाम्- शेषे षष्ठी। मेघानाम्।

पतताम्- शेषे षष्ठी। पत् + शतृ + आम्। विहङ्गानाम्।

अभिलाषः- अभि + लष् + घञ् + सु, कर्तरि प्रथमा।

यथाविधः- यथा विधा प्रकारः यस्य स इति बहुब्रीहिः, adjective to अभिलाषः।

प्रवर्तते- प्र- वृत् लट् ते।

Sl. 20. आकाशवायुः- आकाशस्य वायुः इति षष्ठी तत्पुरुषः, कर्तरि प्रथमा।

मुखे- अधिकरणे सप्तमी।

स्वेदलवान्- स्वादानां लवा इति षष्ठी तप्तुरुषः, तान्।

महेन्द्रद्विपदानगन्धी- adjective to आकाशवायुः, महान् इन्द्रः इति कर्म्मधारयः, महेन्द्रस्य द्विपः इति षष्ठी तत्पुरुषः, तस्य दानम् इति षष्ठी तत्पुरुषः, तस्य गन्धः इति षष्ठी तत्पुरुषः। महेन्द्रद्विपदानगन्ध + इनि + सु।

Sl. 21. करेण- करणे तृतीया।

वातायनलम्बितेन- adjective to करेण। वातस्य अनयम् इति षष्ठी तत्पुरुषः, वातायनात् लम्बितः इति पञ्चमी तत्पुरुषः, तेन।

स्पृष्टः- स्पृश् + क्त + सु, adjective to घनः

त्वया- अनुक्ते कर्तरि तृतीया।

चण्डि- सम्बोधने प्रथमा।

धनः - कर्तरि प्रथमा।

उद्भिन्नविद्युद्वलयः adjective to घनः, विद्युत् एव वलयम् इति रूपक कर्मधारयः, उद्भिन्नं विद्युद्वलंय येन इति बहुब्रीहिः।

Sl. 22. अपोढ़विघ्नम्- अपोढ़ाः विघ्नाः यस्मात् इति बहुब्रीहिः, तत्, adjective to जनस्थानम्।

समारब्धनवोटजानि- समारब्धानि नवोटजानि येषु इति बहुब्रीहिः, तानि। नवानि उटजानि इति नवोटजानि इति कर्म्मधारयः, adjective to आश्रममण्डलानि।

चीरभृतः- कर्तरि प्रथमा।



चीरं वल्कलं बिभ्रति ये ते इति उपपद तत्पुरुषः। आश्रममण्डलानि- 'अधिशोङ्स्थासां कर्म' इति कर्मणि द्वितीया। आश्रमाणां मण्डलानि इति षष्ठी तत्पुरुषः।

Sl. 23. स्थली- स्थल has two feminines- स्थला and स्थली।

स्थली means- natural ground अकृतिमा भूमिः and स्थला means artificial ground कृत्रिमा भूमिः।

नूपुरम्- उक्ते कर्मणि प्रथमा।

उर्व्याम्- अधिकरणे सप्तमी।

बद्धमौनम्- adjective to नुपूरम्। बद्धं मौनं येन इति बद्धमौनम् इति बहुब्रीहिः, तत्।

त्वच्चरणारविन्दविश्लेषदुःखात्- हेतौ पञ्चमी।

Sl. 24. रक्षसा- अनुक्ते कर्तरि तृतीया।

अपनीता- अप- नी + क्त + टाप्।

शाखाभिः- करणे तृतीया।

आवर्जितपल्लवाभिः- आवर्जिताः पल्लवाः यासां, ताभिः इति बहुब्रीहि, adjective to शाखाभिः।

अदर्शयन्- दृश् + णिच् + लङ् अन्।

Sl. 25. मृग्यः- कर्त्तरि प्रथमा।

माम्- कर्म्मणि द्वितीया।

समबोधयन्- सम्- अव + वुध् + णिच् + लङ् अन्।

उत्पक्ष्मराजीन- adjective to विलोचनानि,

पक्ष्माणां राजयः इति षष्ठी तत्पुरुषः, उद्गताः पक्ष्मराजयः येषामिति बहुब्रीहिः।

Sl. 26. माल्यवतः- शेषे षष्ठी।

अम्बरलेखि- adjective to शृङ्गम्,

मया- अनुक्तै कर्त्तरि तृतीया।

त्वद्वियोगाश्रु- उक्ते कर्मणि प्रथमा।

समम्- युगपत्।

Sl. 27. धाराहतपल्लवानाम्- शेषे षष्ठी। धाराभिः आहतानि इति तृतीया तत्पुरुषः, धाराहतानि पल्लवानि इति कर्मधारयः, तेषाम्।

सिनग्धाः- adjective to केकाः,

स्निह् + क्त + जस्।

केकाः- प्रातिपदिकार्थे प्रथमा।

शिखिनाम्– शेषे षष्ठी।

त्वया-'पृथग्विना-नानाभिस्तृतीयान्यतरस्याम्' इति सूत्रवलाद् विनायोगे तृतीया।

बभूवुः- भू + लिट् उस्।

Sl. 28. स्मरता- अनुक्ते कर्त्तरि तृतीया, adjective to मया।

भीरु- सम्बोधने प्रथमा।

तव- शेषे षष्ठी।

उपगूढ़म्- Embrace उप- गुह + क्त + अम्। (नपुंसके)

घनगर्जितानि- उक्ते कर्मणि प्रथमा।

Sl. 29. अक्षिणोत- क्षि + लङ्द

विभिन्नकोशैः- adjective to नवकन्दलैः

विभिन्नाः कोशाः येषामिति बहुब्रीहिः, तैः।

आसारसिक्तक्षितिवाष्पयोगात्- हेत्वर्थे पञ्चमी।

Sl. 30. खेदात्- हेतौ पञ्चमी

पम्पासलिलानि- कर्मणि द्वितीया।

आलक्ष्यपारिप्लवसारसानि and उपान्तवानीरवनोपगूढ़ानि are the two adjectives that qualify पम्पासलिलानि।

दृष्टिः- दृश् + क्तिन् + सु (स्त्रियाम्)।



Sl. 31. द्वन्द्वानि- उक्ते कर्मणि प्रथमा।

मया- अनुक्ते कर्त्तरि तृतीया।

दूरान्तवर्त्तिना- adjective to मया।

ईक्षितानि– ईक्ष् + क्त कर्मणि

सस्पृहम्- स्पृहया सहवर्त्तमानं यथा स्यात् तथा इति बहुब्रीहिः। क्रियाविशेषणे द्वितीया।

Sl. 32. तटाशोकलताम्– तटे अशोकः इति सप्तमी तत्पुरुषः, तस्य लता इति षष्ठी तत्पुरुषः, ताम्। कर्मणि द्वितीया।

तन्वीम्- slender, कर्मणि द्वितीया।

सौमित्रिणा- अनुक्ते कर्त्तरि तृतीया। सुमित्रा + इञ् + टा।

परिरब्धुकामः- adjective to अहम्। परिरब्धुं कामः यस्य इति बहुब्रीहिः।

त्वत्प्राप्तिबुद्ध्या- तव प्राप्तिः इति षष्ठी तत्पुरुषः, तस्याः बुद्धिः इति षष्ठी तत्पुरुषः, तया। हेतौ तृतीया।

निषिद्धः- नि-सिध् + (कर्मणि) क्त + सु

Here the figure of speech is भ्रान्तिमान् which is defined as साम्यादतस्मिंस्तद् बुद्धिर्भ्रान्तिमान् प्रतिभोत्थिता। Here the Ashoka Creeper is conceived as Sita.

Sl. 33. स्वनम् Sound, शब्दम्।

काञ्चनकिङ्किणीनाम्- शोषे षष्ठी।

विमानान्तरलम्बिनीनाम्- adjective to काञ्चनकिङ्किणीनाम्।

Sl. 34. त्वया- अनुक्ते कर्त्तरि तृतीया।

पेशलमध्या- adjective to त्वया।

पञ्चवटी- पञ्चानां वटानां समाहारः इति पञ्चवटी- इति द्विगुः, ङीप्।

(अश्वत्थ, विल्व, वट, धात्री and अशोक- these are the five trees called पञ्चवटी)

Sl. 35. अनुगोदम्- गोदायाः समीपे इति अव्ययीभावः।

मृगयानिवृत्तः- मृगयायाः निवृत्तः इति पञ्चमी तत्पुरुषः।

तरङ्गवातेन- अनुक्ते कर्त्तरि तृतीया।

वानीरगृहेषु- अधिकरणे सप्तमी।

वानीराणां गृहाणि इति षष्ठी तत्पुरुषः, तेषु।

Sl. 36. पदात्- अपादाने पञ्चमी।

मघोनः- शेषे षष्ठी।

मुनेः- शेषे षष्ठी।

स्थानपरिग्रहः- Hermitage

Nahusa : Nahusa is the fore-father of the kings of human race. He was the son of Ayu and the father of Yayati. He was very pious and learned king. But, he becoming the king of heaven for some reason, became very passionate and desired to have Sachi, the wife of Indra, as his consort, Sachi told Nahusa that she would accept him provided he could come to her place riding on a planque drawn by sages. Nahusa asked the seven sages to pull the chariot to heaven. The sages could not move fast. At this, Nahusa being impartient, kicked Agastya on his head and asked him to move fast by using the word Sarpa (सर्प). Agastya cursed Nahusa to become a snake. As a result, Nahusa had to come down to earth in the form of a snake.



Sl. 37. त्रेताग्निधूमाग्रम्-त्रेता चासौ अग्निश्च इति कर्मधारयः, तस्य धूमः इति षष्ठी तत्पुरुषः, तस्य अग्रम् इति षष्ठी तत्पुरुषः। In the Vedic Soma sacrifice three Agnis, viz- Daksinagni, Garhapatya and Ahavaniyagni are required. These three Agnis are together called त्रेताग्नि।

अनिन्द्यकीर्त्तेः- adjective to तस्य। न निन्द्या इति नञ तत्पुरुषः, अनिन्द्या कीर्त्तिः यस्य स इति बहुव्रीहिः।

लघिमानम्- लघु + इमनिच् + अम्। कर्मणि द्वितीया। objective to the verb समश्नुते।

Here the रजोविमुक्तः (being freed from rajas) is the hetu (cause) of becoming लघिमा (lightness). Hence, the figure of speech is काव्यलिङ्ग which is defined as "हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते।"

Sl. 38. मुनेः- शेषे षष्ठी।

मानिनि- सम्बोधने प्रथमा।

शातकर्णेः- शेषे षष्ठी। शतकर्ण + इञ् + ङस्।

विदूरात्- हेतौ पञ्चमी।

Mandakarni is found is some editions. Hence, Satakarneh (Satakarni) may be said to have been used to mean Mandakarni.

Sl. 39. सः- Here सः is used to mean the sage Satakarni.

दर्भाङ्कुरमात्रवृत्तिः adjective to सः।

दुर्भाणाम् अङ्कुराः इति षष्ठी तत्पुरुषः, दर्भाङ्कुर एव इति दर्भाङ्कुरमात्रम् इति मयूरव्यंसकादित्वात् समासः, दुर्भाङ्कुरमात्रम् वृत्तिः यस्य सः इति बहुब्रीहिः।

मृगैः- सहयुक्तेऽप्रधाने' इति तृतीया।

मघोना- अनुक्ते कर्त्तरि तृतीया।

Sl. 40. प्रसक्तसङ्गीतमृदङ्गघोषः- कर्त्तरि प्रथमा।

प्रसक्तं सङ्गीतं इति कर्मधारयः, तस्मै मृदङ्ग इति चतुर्थी तत्पुरुषः, तस्य घोषः इति षष्ठी तत्पुरुषः।

पुष्पकचन्द्रशालाः- पुष्प + कन्।

पुष्पकस्य चन्द्रशालाः इति षष्ठी तत्पुरुषः।

the place on the top of the Puspaka chariot.

क्षणम्- 'अत्यन्तसंयोगे द्वितीया।'

Sl. 41. तपस्वी- कर्त्तरि प्रथमा। तपस् + विनि + सु (पुं)।

सुतीक्ष्णः- Name of sage who engaged himself in hard penance by keeping fire on four sides and the Sun overhead.

ललाटन्तपसप्तसप्तिः- an adjective to तपस्वी।

सप्त सप्तयः अश्वः यस्य इति सप्तसप्तिः इति बहुब्रीहिः।

ललाटन्तपः सप्तसप्तिः यस्य इति बहुब्रीहिः।

हविर्भुजान्- अग्नीनाम्।

तपस्यति-तपस् + क्यङ् + लट् ति। General verb with क्यङ् becomes आत्मनेपदी, by the rule "तपसः परस्मैपदंच" allows परस्मैपदी here.

चरितेन- प्रकृत्यादिभ्य उपसंख्यानम् इति तृतीया।

It is said that the Sun has seven horses which draw the Chariot of the Sun.



Sl. 42. जनितेन्द्रशङ्कम्- adjective to अमुम्।

इन्द्रस्य शङ्का इति षष्ठी ततुरुषः, जनिता इन्द्रशङ्का येन सः इति बहुब्रीहिः, तम्।

Sl. 43. प्रयुङ्क्ते- प्र-युज् + लट् ते।

ऊर्द्धवाहुः- ऊर्द्धौ बाहू यस्य इति बहुब्रीहिः, सः।

मृगाणाम्- सव्यादितरं दक्षिणं भुजम् इति मल्लिनाथः। This word is meant for denoting the right hand.

अक्षमालावलयम्- adjective to भुजम्।

अक्षाणां माला इति षष्ठी तत्पुरुषः, अक्षमाला एव वलयं यस्य इति बहुब्रीहिः, तम्।

इतः- इदम् + तसिल्।

Sl. 44. वाचंयमत्वात्- हेतौ पञ्चमी।

प्रणतिम्- प्र-नम् + क्तिन् + अम्।

कम्पेन- करणे तृतीया by nodding.

प्रतिगृह्य- प्रति- गृह् + ल्यप्।

सन्निधत्ते- सम्-नि-धा- + लट् ते।

Sl. 45. शरण्यम्- an adjective to तपोवनम्।

शरण + यत्।

पावनम्- adjective to तपोवनम्।

सन्तर्प्य- सम्-तृप् + णिच् + ल्यप्।

समिद्भिः- करणे तृतीया।

अहौषित्- हु + लुङ्द्।

शरभङ्गनाम्नः शरभङ्गः नाम यस्य इति बहुब्रीहिः, स, तस्य।

शेषे षष्ठी।

चिराय- चिरम्।

Sl. 46. अतिथीनाम्- कृद् योगे कर्मणि षष्ठी। अविद्यमानः तिथिः येषाम् इति बहुब्रीहिः, तेषाम्।

पादपेषु- अधिकरणे सप्तमी। पद्भ्यां पाति इति पाद- पा + क + सुप्।

Sl. 47. वन्धुरगात्रि- सम्बोधने प्रथमा।

The description of the Chitrakuta starts from this verse.

ककुद्मान्- वृषभः।

Sl. 48. प्रसन्नस्तिमितप्रवाहा- adjective to सरित्।

प्रसन्नश्च स्तिमितश्च प्रवाहः यस्याः इति भूमेः- शेषे षष्ठी।

The description of Mandakini.

Sl. 49. आदाय- आ- दा + ल्यप्।

सुगन्धि- adjective to प्रवालम्, having fragrance of its own.

शोभनः गन्धः यस्य इति बहुब्रीहिः।

मया- अनुक्ते कर्त्तरि तृतीया।

अनुगिरम्- गिरेः समीपे इति अव्ययीभावः समासः।

Sl. 50. अपुष्पलिङ्गात्- ल्यब्लोपे कर्मणि पञ्चमी।

अत्रेः- शेषे षष्ठी।

The figure of speech is विभावना। When the effect is produced without cause, it is called विभावना. It is defined in the Sahitya Darpana 'विभावना विना हेतुं कार्योत्पत्तिर्यदुच्यते।'

The description of the hermitage of Arti starts from this verse.



Sl. 51. अभिषेकाय- तुमर्थाच्च भाववचनात् इति चतुर्थी। अभि- सिच् + घञ् + ङे।

तपोधनानाम्- कृद् योगे कर्त्तरि षष्ठी।

त्रिस्रोतसाम्- श्रीणि स्रोतांसि यस्या इति बहुब्रीहिः, ताम्।

The Ganges is known as त्रिस्रोता, as this river is called Mandakini in heaven, Ganges on earth and Bhogavati in the nether region.

Sl. 52. बीरासनैः- करणे तृतीया।

ऋषीणाम्- शेषे षष्ठी।

निवातनिष्कम्पतया- हेतौ तृतीया।

शाखिनः- वृक्षाः।

Here the figure of speech is उत्प्रेक्षा।

Sl. 53. त्वया- अनुक्ते कर्त्तरि तृतीया।

श्यामः- अव्यय योगे प्रथमा।

उपयाचितः- प्रार्थितः।

सपद्मरागः पद्मरागैः सह वर्तमानः यः इति बहुब्रीहिः, सः।

फलितः- फल + इतच् + सु, adjective to वटः।

Here the figure of speech is उपमा।

Sl. 54. अनवद्याङ्गि- सम्बोधने प्रथमा।

यमुनातरङ्गैः- अनुक्ते कर्त्तरि तृतीया।

मुक्तामयी- adjective to यष्टिः।

सितपङ्कजानाम्- शेषे षष्ठी।

From this verse, the description of the confluence of the Ganges and Yamuna starts and it continues upto the verse 57. Here, it is seen that four verses are dedicated to complete the description of the

confluence of these two rivers. As such, it is technically called 'Kalapaka' which is defined "कलापकं चतुर्भिश्च पञ्चभिः कुलकं मतम्।"

Sl. 55. कादम्बसंसर्गवती- adjective to पङ्क्तिः।

कालागुरुदत्तपत्र- adjective to भक्तिः।

कालम् अगुरु इति कर्मधारयः, कालागुरुणा दत्तम् इति तृतीया तत्पुरुषः तादृशं पत्रं यस्यां सा इति बहुब्रीहिः।

भक्तिः- भज् + क्तिन् + सु।

भूवः- शेषे षष्ठी।

चन्दनकल्पिता- adjective to भक्तिः।

Sl. 56. छायाविलीनैः- adjective to तमोभिः।

तमोभिः- अनुक्ते कर्त्तरि तृतीया।

शवलीकृता- adjective to शरदभ्रलेखा।

आलक्ष्यनभः प्रदेशा- adjective to शरदभ्रलेखा।

Sl. 57. कृष्णोरगभूषणा- adjective to तनुः,

कृष्णाः उरगाः इति कर्मधारयः,

कृष्णोरगा भूषणं यस्याः सा इति बहुब्रीहिः

भस्माङ्गरागा- adjective to तनुः।

ईश्वरस्य- शेषे षष्ठी।

तनुः- शरीरं, देहः, कायः।

Here the figure of speech is मालोपमा। मालोपमा is said to occur when an Upameya- the object under discussion is compared with more Upamanas- the standard of comparision. Here the stream of the Ganges is compared with many upamanas. The Malopama is defined as "यदेकस्योपमानं बहु दृश्यते।"

l l l l



२

# श्रीमद्भगवद्गीतायाम्

## द्वितीयाध्यायः

## सांख्ययोगः

---

### सञ्जय उवाच

तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणम्।
विषीदन्तमिदं वाक्यमुवाच मधुसूदनः॥ १॥

### श्रीभगवानुवाच

कुतस्त्वा कश्मलमिदं विषमे समुपस्थिते।
अनार्यजुष्टमस्वर्ग्यमकीर्त्तिकरमर्जुन॥ २॥

क्लैव्यं मास्म गमः पार्थ नैतत्त्वय्युपपद्यते।
क्षुद्रं हृदयदौर्वल्यं त्यक्त्वोत्तिष्ठ परन्तप॥ ३॥

## अर्जुन उवाच

कथं भीष्ममहं संख्ये द्रोणञ्च मधुसूदन।
इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन॥ ४॥

गुरूनहत्वा हि महानुभावान्
श्रेयो भोक्तुं भैक्ष्यमपीह लोके।
हत्वार्थकामांस्तु गुरूनिहैव
भुञ्जीय भोगान् रुधिरप्रदिग्धान्॥ ५॥

न चैतद्विद्मः कतरन्नो गरीयो
यद्वा जयेम यदि वा नो जयेयुः।
यानेव हत्वा न जिजीविषाम-
स्तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः॥ ६॥

कार्पण्यदोषोपहतस्वभावः
पृच्छामि त्वां धर्मसंमुढ़चेताः।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे
शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्॥ ७॥

न हि प्रपश्यामि ममापनुद्याद्
यच्छोकमुच्छोषणामिन्द्रियाणाम्।
अवास्य भूमावसपत्नमृद्धं
राज्यं सुराणामपि चाधिपत्यम्॥ ८॥

## सञ्जय उवाच

एवमुक्त्वा हृषीकेशं गुड़ाकेशः परन्तप।
न योत्स्य इति गोविन्दमुक्त्वा तूष्णीं बभूव ह॥ ९॥



तमुवाच हृषीकेशः प्रहसन्निव भारत।
सेनयोरुभयोर्मध्ये विषीदन्तमिदं वचः॥ १०॥

## श्रीभगवानुवाच

अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे।
गतासूनगातासूंश्च नानुशोचन्ति पण्डिताः॥ ११॥

न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः।
न चैव न भविष्यामः सर्वे वयमतः परम्॥ १२॥

देहिनोऽस्मिन् यथा देहे कौमारं यौवनं जरा।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति॥ १३॥

मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः।
आगामापामियोऽनित्यास्तांस्तितिक्षस्व भारत॥ १४॥

यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ।
समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते॥ १५॥

नासतो विद्यते भावो नाभावो विद्यते सतः।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः॥ १६॥

अविनाशि तु तद्विद्धि येन सर्वमिदं ततम्।
विनाशमव्ययस्यास्य न कश्चित् कर्तुमर्हति॥ १७॥

अन्तवन्त इमे देहा नित्यस्योक्ताः शारीरिणः।
अनाशिनोऽप्रमेयस्य तस्माद् युध्यस्व भारत॥ १८॥

य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम्।
उभौ तौ न विजानीतो नायं हहन्ति न हन्यते॥ १९॥

न जायते म्रियते वा कदाचिन्
नायं भूत्वा भविता वा न भूयः।
अजो नित्यः शाश्वतोऽयं पुराणो
न हन्यते हन्यमाने शरीरे॥ २०॥

वेदाविनाशिनं नित्यं य एनमजमव्ययम्।
कथं स पुरुषः पार्थ कं घातयति हन्ति कम्॥ २१॥

वासांसि जीर्णानि यथा विहाय
नवानि गृह्णाति नरोऽपराणि।
तथा शरीराणि विहार जीर्णा-
न्यन्यानि संयाति नवानि देही॥ २२॥

नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः।
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः॥ २३॥

अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च।
नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः॥ २४॥

अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते।
तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि॥ २५॥

अध चैनं नित्यजातं नित्यं वा मन्यसे मृतम।
तथापि त्वं महावाहो नैनं शोचितुमर्हसि॥ २६॥



जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च।
तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि॥ २७॥

अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत।
अव्यक्तनिधनान्येव तत्र का परिदेवना॥ २८॥

आश्चर्यवत् पश्यति कश्चिदेन-
माश्चर्यवद् वदति तथैव चान्यः।
आश्चर्यवच्चैनमन्यः शृणोति
श्रुत्वाप्येनं वेद न चैव कश्चित्॥ २९॥

देही नित्यमवध्योऽयं देहे सर्वस्य भारत।
तस्मात् सर्वाणि भूतानि न त्वं शोचितुमर्हसि॥ ३०॥

स्वधर्ममपि चावेक्ष्य न विकम्पितुमर्हसि।
धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यते॥ ३१॥

यदृच्छया चोपपन्नं स्वर्गद्वारसपावृतम्।
सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धमीदृशम्॥ ३२॥

अथ चेत् त्वमिमं धर्म्यं संग्रामं न करिष्यसि।
ततः स्वधर्मं कीर्त्तिञ्च हित्वा पापमवाप्स्यसि॥ ३३॥

अकीर्त्तिञ्चापि भूतानि कथयिष्यन्ति तेऽव्ययाम्।
सम्भावितस्य चाकीर्त्तिर्मरणादतिरिच्यते॥ ३४॥

भयाद् रणादुपरतं मंस्यन्ते त्वां महारथाः।
येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवम्॥ ३५॥

अवाच्यवादांश्च बहून् वदिष्यन्ति तवाहिताः।
निन्दन्तस्तव सामर्थ्यं ततो दुःखतरं नु किम्॥ ३६॥

हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम्।
तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः॥ ३७॥

सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि॥ ३८॥

एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु।
बुद्ध्या युक्तो यया पार्थ कर्मवन्धं प्रहास्यसि॥ ३९॥

नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते।
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात्॥ ४०॥

व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन।
बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम्॥ ४१॥

यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः।
वेदवादरताः पार्थ नान्यदस्तीति वादिनः॥ ४२॥

कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदाम्।
क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति॥ ४३॥

भोगैश्वर्यप्रसक्तानां तयापहृतचेतसाम्।
व्यवसायात्मिका बुद्धिः समाधौ न विधीयते॥ ४४॥



त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन।
निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान्॥ ४५॥

यावानर्थ उदपाने सर्वतः संप्लुतोदके।
तावान् सर्वेषु वेदेषु ब्राह्मणस्य विजानतः॥ ४६॥

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि॥ ४७॥

योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते॥ ४८॥

दूरेण ह्यवरं कर्म बुद्धियोगाद्धनञ्जय।
बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः॥ ४९॥

बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते।
तस्माद् योगाय युज्यस्व योगः कर्मसु कौशलम्॥ ५०॥

कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः।
जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम्॥ ५१॥

यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति।
तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च॥ ५२॥

श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला।
समाधावचला बुद्धिस्तदा योगमवाप्स्यसि॥ ५३॥

## अर्जुन उवाच

स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव।
स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम्॥ ५४॥

## श्रीभगवानुवाच

प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान्।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते॥ ५५॥

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते॥ ५६॥

यः सर्वत्रानभिस्नेहस्तत्तत् प्राप्य शुभाशुभम्।
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता॥ ५७॥

यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता॥ ५८॥

विषया विनिवर्त्तन्ते निराहारस्य देहिनः।
रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्त्तते॥ ५९॥

यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः॥ ६०॥

तानि सर्वाणि संयम्य युक्त आसीत मत्परः।
वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता॥ ६१॥



ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते।
सङ्गात् सञ्जायते कामः कामात् क्रोधोऽभिजायते॥ ६२॥

क्रोधाद् भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः।
स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात् प्रणश्यति॥ ६३॥

रागद्वेषविमुक्तैस्तु विषयानिन्द्रियैश्चरन्।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगगच्छति॥ ६४॥

प्रसादे सर्वदुःखानां हानिरस्योपजायते।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते॥ ६५॥

नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना।
न चाभावयतः शान्तिरशान्तस्य कुतः सुखम्॥ ६६॥

इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते।
तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि॥ ६७॥

तस्माद् यस्य महावाहो निगृहीतानि सर्वशः।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता॥ ६८॥

या निशा सर्वभूतानां तस्यां जागर्त्ति संयमी।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः॥ ६९॥

आपूर्यमाणमचलप्रतिष्ठं
समुद्रमापः प्रविशन्ति यद्वत्।
तद्वत् कामा यं प्रविशन्ति सर्वे
स शान्तिमाप्रोति न कामकामी॥ ७०॥

विहाय कामान् यः सर्वान् पुमांश्चरति निःस्पृहः।
निर्ममो निरहंकारः स शान्तिमधिगच्छति॥ ७१॥

एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति।
स्थित्वास्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति॥ ७२॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे सांख्ययोगनाम द्वितीयोऽध्यायः॥

l l l l



# SRIMAD-BHAGAVAD-GITA

# श्रीमद्भगवद्गीता

## सांख्ययोगः

### Introduction :

The Srimad-Bhagavad-Gita is one of the most universal scriptures of the world. It is a comprehensive work that speaks of universal religion. It is a religious scripture particularly for the Hindus.

The Gita is based on the Bhismaparvan of the Mahabharata. W ith eighteen chapters, it contains 700 verses. It is in the form of a conversation between Srikrsna and Arjuna in the battlefield. Lord Krsna exhorts and encourages Arjuna who feels reluctant to light his own kinsmen in the opposite camp.

The Gita is a book containing the highest esoteric doctrines. It is the essence of the Vedas. It is a very popular book among the Indians and highly praised by the western scholars. It can be interpreted in consonance with all the six orthodox systems of Indian philosophy. It is regarded as the Upanisad.

According to Sankaracarya, the purpose of the Gita is to free human minds from sorrow, grief and illusion which are the causes of this world of suffering.

## Following is the synopsis of the Gita :

| | | |
|---|---|---|
| Chapter I | : | Entitled "The yoga of dejection of Arjuna" (अर्जुनविषादयोग)। |
| Chapter II | : | Entitled "The yoga of knowledge (सांख्य-योग)। |
| Chapter III | : | Entitled "The yoga of Action" (कर्मयोग)। |
| Chapter IV | : | Entitled "The yoga of knowledge, The discipline of action of knowledge" (ज्ञानकर्म-संन्यासयोग)। |
| Chapter V | : | Entitled "The yoga of Action of knowledge" (कर्मसंन्यासयोग)। |
| Chapter VI | : | Entitled "The yoga of self-control" आत्मसंयमयोग)। |
| Chapter VII | : | Entitled "The yoga of knowledge of Nirguna Brahma and knowledge of Manifest Divinity" (ज्ञानविज्ञानयोग)। |
| Chapter VIII | : | Entitled "The yoga of the Indestructible Brahma" (अक्षरब्रह्मयोग)। |
| Chapter XI | : | Entitled "The yoga of the sovereign science and the sovereign secret" राजविद्याराजगुह्ययोग)। |
| Chapter X | : | Entitled "The yoga of the Divine Glories" (विभूतियोग)। |
| Chapter XI | : | Entitled "The yoga of the vision of the universal form" (विश्वरुपदर्शन-योग)। |
| Chapter XII | : | Entitled "The yoga of Devotion" (भक्तियोग)। |
| Chapter XIII | : | Entitled "The yoga of Discrimination between the Field and the knower of the Field" (क्षेत्रक्षेत्रज्ञविभाग-योग)। |
| Chapter XIV | : | Entitled "The yoga of classification of the three Gunas" (गुणत्रयविभागयोग)। |
| Chapter XV | : | Entitled "The yoga of the supreme self" (पुरुषोत्तमयोग)। |
| Chapter XVI | : | Entitled "The yoga of the discrimination between the Divine and the Demonical properties" (दैवासुर-सम्पद्विबागयोग।) |
| Chapter XVII | : | Entitled "The yoga of the classification of the three fold faith" (श्रद्धात्रयविभाग-योग)। |
| Chapter XVIII | : | Entitled "The yoga of liberation and self-surrender" (मोक्षसंन्यास-योग)। |



## Contents of the 2nd chapter of the Srimad-Bhagavad-Gita

| | | |
|---|---|---|
| Verses from 1–10 | : | Arjuna and Srikrsna discussing Arjuna's faint-heartedness. |
| Verses from 11–16 | : | Description of the yoga of knowledge (Samkhya-yoga) |
| Verses from 17–30 | : | Description of soul. |
| Verses from 31–38 | : | The duties of a ksatriya to engage himself in bettle. |
| Verses from 39–53 | : | Description of the yoga of selfless action (Niskama-karma) |
| Verses from 54–72 | : | The Marks (characteristics) of a man of stable mind (sthitaprajna). |

# Notes :

Sl. 1. तं- तद् + पुं २या एकवचनम्; कर्मणि द्वितीया; Adj. to अर्जुनं which is understood.

तथा- अव्ययः।

वाक्यमुवाच- वाक्यंम् + उवाच; Öवच् + लिट् अ = उवाच।

मधुसूदनः- मधुं मधुनामकं दैत्यं सूदयति नाशयति इति मधुसूदनः; an epithet of Visnu. कर्त्तरि १मा।

Sl. 2. **श्रीभगवान्-** श्रीयुक्तः भगवान्, श्रीभगवान्। God is known as भगवान् as He has siix attributes (= भग). Those are ऐश्वर्य (= power of command), वीर्य (= power to defeat enemy), यश (= fame), ज्ञान (= knowledge), श्री (= wealth or prosperity) and वैराग्य (= non-attachment). cf.-

'ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना॥"

कुतस्त्वा- कुतः + त्वा; त्वा- Act. to त्वाम्।

विषमे- कालाधिकरणे ७मी।

अर्जुन- सम्बोधने १मा।

Sl. 3. क्लैव्यं- alt. to क्लीवत्वं, cowardice.

मास्म गमः- मास्म अगमः; Öगम् + स् = अगमः। Here, अ of अगमः is elided according to the rule "न माङ् योगे।"

पार्थ- सम्बोधने १मा। पृथायाः अपत्यं पुमान् इति पार्थः। Another name of अर्जुन. He was known so, because, he was the son of पृथा.



त्वस्युपपद्यते- त्वयि + उपपद्यते।

उप- Öपद् + कर्मणि लट् ते।

त्यक्त्वोत्तिष्ठ- त्यक्त्वा + उत्तिष्ठ। Öत्यज् + क्त्वाच्;

उत्- Öस्था + लोट् हि।

परन्तप- सम्बोधने १मा। परान् शत्रून् तापयति इति परन्तपः।

Sl. 4. पूजार्हावरिसूदन- सम्बोधने १मा। पूजार्हौ + अरिसूदन।

Sl. 5. गुरूनहत्वा- गुरून् + अहत्वा; गुरु + २या बहुवचनम् = गुरून्;

Öहन् + क्त्वाच् = हत्वा; न हत्वा = अहत्वा।

भोक्तुं- Öभुज् + तुमुन्।

भुञ्जीय- Öभुज् + बिधिलिङ् ईय।

Sl. 6. चैतद्विद्मः- च + एतत् + विद्मः। Öविद् (अदादिगणीय) + लट् मस् = विद्मः; alt.- विद्म।

धार्तराष्ट्राः- धृतराष्ट्रस्य पुत्रा इति धृतराष्ट्र + अण् + १मा बहु। The sons of धृतराष्ट्र।

Sl. 7. धर्मसंमूढ़चेताः- संमूढ़ चेतः, संमूढ़चेतः, (कर्मधारयसमासः); धर्मविषये संमूढ़चेतः यस्य सः, धर्मसंमूढ़चेताः; Confused in respect of duty.

ब्रूहि- Öब्रू + लोट् हि।

शाधि- Öशास् + लोट् हि।

Sl. 8. प्रपश्यामि- प्र-Öदृश् + लट् मि।

अवाप्य- अव-Öआप् + ल्यप्।

भूमावसपत्नमृद्धं- भूमौ + असपत्नम् + ऋद्धं।

Sl. 9. हृषीकेशं = श्रीकृष्णं। हृषीकानां इन्द्रियाणाम् ईशं = हृषीकेशं।

श्रीकृष्ण is the lord of all the sense-organs, and so, he was known so.

गुड़ाकेशः- गुड़ाकायाः निद्रायाः ईशः, गुड़ाकेशः (तत्पुरुषः)। An epithet of अर्जुन। अर्जुन was known as गुड़ाकेश because, he could remain without sleep for long days.

Sl. 10. भारत- भरतवंशोद्भव। सम्बोधने १मा। Here, the word refers to धृतराष्ट्र who was also a descendent of भरत।

Sl. 11 भाषसे- Öभाष् + लट् से।

गातासूनगतासूंश्च = गतासून् = अगतासून् + च।

Sl. 12. त्वेवाहं = तु + एव + अहं।

जातु- अव्ययः।

आसं- Öअस् + लङ् अम्।

नेमे = न + इमे; इदम् (पुं) + १मा बहु = इमे।

जनाधिपाः- अधि समन्तात् पान्ति रक्षन्ति इति अधि-Öपा + क + पुं १मा बहु = अधिपाः। जनानाम् अधिपाः, जनाधिपाः (६ष्ठी तत्)।

Sl. 13. देहिनः- देह + अस्त्यर्थे इनिन् = देहिन्; देहिन् + २या बहु वचनम् = देहिनः।

देहान्तरप्राप्तिर्धीरस्तत्र = देहान्तरप्राप्तिः + धीरः + तत्र; अन्यः देहः, देहान्तरम् (अव्ययीभावः)।

मुह्यति- Öमुह् + लट् ति।

Sl. 14. मात्रास्पर्शाः- Contact of the objects with the sense organs.



कौन्तेय- कुन्ती + ढक्; सम्बोधने १मा।
शीतोष्णसुखदुःखदाः- शीतं च उष्णं च सुखं च दुःखं च, शीतोष्णसुखदुःखानि (एकशेषः); शीतोष्णसुखदुःखदाः (उपपदसमासः)।

तितिक्षस्व- Öतिज् (to tolerate) + सन् + लोट् स्व।

Sl. 15. व्यथयन्त्येते- Öव्यथ् + लट् अन्ति = व्यथयन्ति; व्यथयन्ति + एते = व्यथयन्त्येते।

पुरुषर्षभ- पुरुषेषु ऋषभः, पुरुषर्षभः (७मी तत्); सम्बोधने १मा। Addressed to Arjjuna.

Sl. 16. दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः = दृष्टः + अन्तः + तु + अनयोः + तत्त्वदर्शिभिः।

Sl. 17. तद्विद्धि = तत् + विद्धि; Öविद् + लोट् हि = विद्धि। तत् means the आत्मन् here.

Sl. 18. युध्यस्व = Öयुध् + लोट् स्व।
भारत- सम्बोधने १मा। Refers to Arjuna.

Sl. 19. वेत्ति- Öविद् (अदादि) + लट् ति।

हन्तारं- हन्तृ + २या एकवचनम्।

यश्चैनं- यः + च + एनं।

हन्ति- Öहन् + लट् ति।

हन्यते = Öहन् + (कर्मणि) लट् ते।

Sl. 20. जायते- Öजन् + लट् ते।
म्रियते- Öमृ + लट् ते।

Sl. 21. वेदाविनाशिनं- वेद + अविनाशिनं; वेद- Öविद् + लोट् हि, alt.- वेत्ति।

एनमजमव्येंयम्- एनम् + अजम् + अव्ययम्।

घातयति- Öहन् + णिच् + लट् ति।

Sl. 22. वासांसि- वासस् + २या बहुवचनम्। कर्मणि २या।

विहाय- वि-Öहा + ल्यप्।

गृह्णाति- Öग्रह् + लट् ति।

देही- देह + इनिन् = देहिन्; देहिन् + पुं १मा १ वचनम् = देही।

Sl. 23. नैनं = न + एनं

छिन्दन्ति- Öछिद् + लट् अन्ति।

Sl. 24. अच्छेद्योऽयमदाह्योयमक्लेद्योऽशोच्य एव = अच्छेद्यः + अयम् + अदाह्यः + अयम् + अक्लेद्यः + अशोच्यः + एव।

स्थाणुः- Another name of शिव। Here, it means one which is permanent.

सनातनः- सदा भवः, सनातनः; eternal.

Sl. 25, 26. विदित्वैनं = विदित्वा + एनं।

नानुशोचितुमर्हसि = न + अनुशोचितुम् + अर्हसि;

अनु- Öशुच् + तुमुन् = अनुशोचितुम्; Öअर्ह् + लट् सि = अर्हसि।

महावाहो- सम्बोधने १मा।

Sl. 27. अपरिहार्य्ये, अर्थे- विषयाधिकरणे ७मी।

Sl. 28., 29. कश्चिदेनमाश्चर्यवद् वदति = कः + चित् + एनम् + आश्चर्यवत् + वदति।

तथैव = तथा + एव।

शृणोति- Öश्रु + लट् ति;

Öश्रु + क्त्वाच् + श्रुत्वा।



Sl. 31. चावेक्ष्य = च + अवेक्ष्य; अव- Öईक्ष् + ल्यप् = अवेक्ष्य।

धर्म्याद्धि = धर्म्यात् + हि।

युद्धाच्छ्रेयोऽन्यत् = युद्धात् + श्रेयः + अन्यत्; धर्म्यात्, युद्धात्- निकृष्टार्थे ५मी।

Sl. 32. सुखिनः- सुखमस्य अस्तीति सुखी; सुख + इनिन् + पुं १मा बहुवचने- सुखिनः।

Sl. 33. चेत्त्वमिमं = चेत् + त्वम् + इमं।

चेत्- अव्ययः।

हित्वा- Öहा + क्त्वाच्।

पापमवाप्स्यसि = पापम् + अवाप्स्यसि

अव- Öआप् + लृट् स्यसि = अवाप्स्यसि।

Sl. 34. सम्भावितस्य- of him who is respected by all.

चाकीर्तिर्मरणादतिरिच्यते = च + अकीर्तिः + मरणात् + अतिरिच्यते।

Sl. 35. भयाद्रणादुपरतं = भयात् + रणात् + उपरतं।

भयात्- हेतौ ५मी; रणात्- अपादाने ५मी।

महारथाः- महान्तः रथाः येषां ते, (बहुब्रीहिः); great warriors.

Sl. 36. निन्दन्तस्तव = निन्दन्तः + तव; Öनिन्द् + शतृ + पुं १मा बहु।

Sl. 37. प्राप्स्यसि- प्र- Öआप् + लृट् स्यसि।

Sl. 38. सुखदुःखे- सुखं च दुःखं च, (द्वन्द्व)।

Sl. 39. तेऽभिहिता = ते + अभिहिता। युष्मद् + ४र्थी एकव., ते alt. तुभ्यम्।

Sl. 40. नेहाभिक्रमनाशोऽस्ति = न + इह + अभिक्रमनाशः + अस्ति। अभिक्रमस्य नाशः, अभिक्रमनाशः, (६ष्ठी तत्)। Destruction of works begun.

Sl. 41. बुद्धिरेकेह = बुद्धिः + एका + इह।

अव्यवसायी is that who is of fickle nature and who works only to serve a selfish interest.

Sl. 42. वाचं- बाक् (स्त्री) + २या एकवचनम्।

समाधौ- सम्-आ-Öधा + कि = समाधि; समाधि + ७मी एकवचनम् = समाधौ; अधिकरणे ७मी।

विधीयते- वि-Öधा + कर्मणि लट् ते।

बुद्धिः- बुध् + क्तिन्।

Sl. 45. त्रैगुण्यविषया वेदाः- the Vedas are pertaining to the three qualities, e.g., सत्त्वं, रजः and तमः।

निर्योगक्षेमः- क्षेम is the protection of the obtained. One is to give up the ideas of योग and श्रेम in order to realise god.

Sl. 47. कर्मण्येवाधिकारस्ते = कर्मणि + एव + अधिकारः + ते सङ्गोऽस्त्वकर्मणि = सङ्गः + अस्तु + अकर्मणि। The work that leads people to the fulfilment of selfish interest is known as अकर्म and, one should not have attachment to अकर्म.

Sl. 48. धनञ्जय- Another name of Arjuna. He was known so, because, he once defeated Kubera, the protector of the riches of gods, and brought treasures for his eldest brother Yudhisthira. सम्बोधने १मा।



Sl. 49. कृपणाः फलहेतवः- Those who work with desire for fruit of action are pitiful. फलहेतु + १मा बहुवचनम् = फलहेतवः।

Sl. 50. जहातीह = जहाति + इह; Öहा + लट् ति = जहाति। कर्मसु- कर्मन् + सुप्; अधिकरणे ७मी।

Sl. 51. गच्छन्त्यनामयम्- गच्छन्ति + अनामयम्; न आमयम्, अनामयम् (अव्ययीभावः)।

Sl. 52. निर्वेद means a state of indifference, i.e. वैराग्य.

Sl. 53. समाधावचला = समाधौ + अचला। Adj. to बुद्धिः।

Sl. 54. स्थिता प्रज्ञा यस्य सः, स्थितप्रज्ञः (बहुब्रीहिः)। "भाष्यते अनया इति भाषा, लक्षणमिति यावत्।"

समाधिस्थस्य- समाधौ तिष्ठति इति (उपपदस.); निर्द्धारणे ६ष्ठी।

स्थितधीः- स्थिता धीः यस्य सः, (बहुब्रीहिः)।

प्रभाषेत- प्र- Öभाष् + विधिलिङ् ईत।

किमासीत- किम् + आसीत; Öआस् + विधिलिङ् ईत।

Sl. 55. प्रजहाति- प्र-Öहा + लट् ति।

कामान्- कर्मणि २या।

स्थितप्रज्ञस्तदोच्यते- स्थितप्रज्ञः + तदा + उच्यते।

Sl. 56. दुःखेष्वनुद्विग्नमनाः- दुःखेषु + अनुद्विग्नमनाः। उद्विग्नं मनः यस्य सः, उद्विग्नमनाः (बहुब्रीहि); न उद्विग्नमनाः, अनुद्विग्नमनाः, (नञ्समासः)।

Sl. 57. द्वेष्टि- Öद्विष् + लट् ति।
प्रतिष्ठिता- प्रति- Öस्था + कर्मणि क्त + स्त्रियामाप्; Adj. to प्रज्ञा।

Sl. 58. संहरते- सम्- Öहृ + लट् ते।
चायं = च + अयं। Refers to the योगी।
कूर्मोऽङ्गनीव = कूर्मः + अङ्गानि + इव।

Sl. 59. विनिवर्तन्ते- वि-नि-Övृत् + लट् अन्ते।

Sl. 60. यततो ह्यपि = यततः + हि + अपि।

Sl. 61. संयम्य = सम्-Öयम् + ल्यप्।

Sl. 62. ध्यायतः = Öध्यै + शतृ + ६ष्ठी १ वचनम्। निर्द्धारणे ६ष्ठी।
सङ्गस्तेषूपजायते = सङ्गः + तेषु + उपजायते। उपजायते = उप-Öजन् + लट् ते।

Sl. 63. क्रोधाद्भवति = क्रोधात् + भवति।
स्मृतिविभ्रमः-स्मृतेः विभ्रमः, (षष्ठी तत्पुरुषः)
क्रोधात, सम्मोहात्, स्मृतिभ्रंशात्- in all these words there are ५मी acc. to अपादाने ५मी।
प्रनश्यति- प्र-Öनश् + लट् ति।

Sl. 64.65. प्रसन्नचेतसः- प्रसन्नं चेतः यस्य सः, प्रसन्नचेताः, तस्य-प्रसन्नचेतसः = of him whose mind is always satisfied.
पर्यवतिष्ठते- परि-अव-Öस्था + लट् ते। Öस्था here is आत्मनेपदी because of the उपसर्ग अव standing before it, according to the rule- "समवप्रविभ्यः स्थः।"

Sl. 69. जागर्ति- Öजागृ + लट् ति।
जाग्रति- Öजागृ + लट् अन्ति।



Sl. 70. अचलप्रतिष्ठम्- न चलं = अचलम् (नञ् समासः); अचला प्रतिष्ठा यस्य तत्, अचलप्रतिष्ठम्; adj. to समुद्रम्।
आपः- अप् + १मा बहुवचनम्।

Sl. 71. विहाय- वि-Öहा + ल्यप्।

Sl. 72. ब्राह्मी स्थितिः- A state realised by ब्रह्मन्, or, a position after realisation of which alone something relating to ब्रह्मन् the creator, may be known.
ऋच्छति- Öऋ + लट् ति।

l l l l

१

**हर्षवर्धनकृते**

# नागानन्दे

**शरीरं क्षणविध्वंसि कल्पान्तस्थायिनो गुणाः**

---

**नायकः** -- मित्रावसो, पश्य शरत्समयपाण्डुभिः पयोदपटलैः प्रावृताः प्रालेयाचलशिखरश्रियम् उद्वहन्त्यचलसानवः।

**मित्रावसुः** -- कुमार, नैवामी मलयसानवः। नागानामस्थिसङ्घाताः खल्वेते।

**नायकः** -- (सोद्वेगम्) कष्टम्। किं निमित्तं पुनरमी सङ्घातमृत्यवो जाताः।

**मित्रावसुः** -- कुमार, कुमार, नैवामी सङ्घातमृत्यवः।

**नायकः** -- मित्रावसो, किमन्यत्?

**मित्रावसुः** -- श्रूयताम्। पुरा किल स्वपक्षपवनापास्तसागरजलस्तरसा रसातलादुद्धृत्य भुजङ्गमान् अनुदिनमाहारयति स्म वैनतेयः।

**नायकः** -- (सोद्वेगम्) कष्टम्। अतिदुष्करं करोति। ततस्ततः।



**मित्रावसुः** -- ततः सकलनागलोकविनाशशङ्किना नागराजेन गरुत्मानमभिहतः।

**नायकः** -- (सादरम्) किं मा भक्षयेति?

**मित्रावसुः** -- नहि, नहि।

**नायकः** -- किमन्यत्।

**मित्रावसुः** -- इदमुक्तम्- तदभिसम्पातत्रासात् सहस्रशः शिशवः पञ्चत्वमुपयान्ति। एवं च सन्ततिसमुच्छेदादस्माकं तवैव स्वार्थहानिर्भवेत्, यदर्थमभिपतति भवान् पातालम्। तवैकैकं भुजङ्गमानामनुदिवसं समुद्रतटस्थितस्याहमेव प्रेषयिष्यामीति। प्रतिपन्नं च तत् पक्षिराजेन।

**नायकः** -- कष्टम्। रक्षिताः किलैवं नागराजेन पन्नगाः।

**जिह्वासहस्रद्वितयस्य मध्ये**
**नैकापि सा तस्य किमस्ति जिह्वा।**
**एकाहिरक्षार्थमहिद्विषोऽद्य**
**दत्तो मयात्मेति यया ब्रवीमि।।1।।**

कष्टम्। अनवसानेयं विपत्तिर्नागानाम्। (आत्मगतम्) अपि नाम शक्नुयाम्यहं स्वशरीरदानादेकस्यापि फणभृतः परिरक्षां कर्तुम्।

(ततः प्रविशाति प्रतीहारः)

**प्रतीहारः** -- आरुढोऽस्मि गिरिशिखरम्। (विलोक्य) अये! मित्रावसुः जामातुः समीपे वर्तते। यदुपसर्पामि। (उपसृत्य प्रणम्य) विजयेतां कुमारौ।

**मित्रावसुः** -- सुनन्द, किं निमित्तमिहागमनम्?

**प्रतीहारः** -- (कर्णे कथयति) एवम्।

**मित्रावसुः** -- कुमार, तातो मामाह्वयति।

**नायकः** -- गम्यताम्।

**मित्रावसुः** -- कुमारेणापि बहुप्रत्यवायेऽस्मिन् प्रदेशे कुतूहलान्न चिरं स्थातव्यम्।

(निष्क्रान्तो मित्रावसुः प्रतीहारश्च)

**नायकः** -- यावदहमपि गिरिशिखरादवरुह्य समुद्रतटमवलोकयामि। (परिक्रामति)

(नेपथ्ये)

हा पुत्रक शङ्खचूड! कथं व्यापद्यमानः किलाद्य त्वं मया द्रष्टव्यः।

**नायकः** -- (आकर्ण्य) अये। योषित इवार्तप्रलापः। तद् यावदुपेत्य केयं कुतोऽस्या भयकारणम् इति स्फुटीकरोमि। (परिक्रामति) (ततः प्रविशति क्रन्दन्त्या वृद्धयानुगम्यमानः शङ्खचूडो गोपायितवस्त्रयुगलः किङ्करश्च)

**वृद्धा** -- (सास्रम्) हा पुत्रक शङ्खचूड। कथं व्यापद्यमान किलाद्य त्वं मया प्रेक्षितव्यः। (चिबुके गृहीत्वा) अनेन मुखचन्द्रेण विरहितमन्धकारीभविष्यति पातालम्।

**शङ्खचूडः** -- अम्ब, किमेवमतिविक्लवा सुतरामात्मानं पीडयसि?

**वृद्धा** -- (निर्वर्ण्य पुत्रस्याङ्गाण्यामृशन्ति) हा पुत्रक, कथं तेऽदृष्टसूर्य-सुकुमारं शरीरं निर्घृणहृदयो गरुड आहारयिष्यति? (कण्ठे गृहीत्वा रोदिति।)



**शङ्खचूडः** -- **अम्ब, अलमलं परिदेवितेन। पश्य--**

**क्रोडीकरोति प्रथमं जातं नित्यमनित्यता।**
**धात्रीव जननी पश्चात्तदा शोकस्य कः क्रमः।।२।।**

**वृद्धा** -- हा पुत्रक, तिष्ठ। मुहूर्तमपि तावद्वदनं ते प्रेक्षिष्ये।

**किङ्करः** -- एहि कुमार, किं तवैतया भणन्त्या। पुत्रस्नेहमोहिता खल्वेषा न राजकार्यं जानाति।

**शङ्खचूडः** -- भद्र, अयमहमागच्छामि।

**किङ्करः** -- (आत्मगतम्) आनीतः खलु मया वध्यशिलासमीपं शङ्खचूडः। यावदेतद्वध्यचिन्हं रक्तांशुकयुगलं दत्वा वध्यशिलां दर्शयामि।

**नायकः** -- अये। इयमसौ योषित्। (शङ्खचूडं दृष्ट्वा) नूनमनेनाप्यस्याः सुतेन भवितव्यम्, यदर्थमाक्रन्दति। (समन्तादवलोक्य) न खलु पुनः किञ्चिद् भयकारणं पश्यामि। तत् कुतोऽस्य भयं भविष्यतीति किमुपेत्य पृच्छामि? अथवा प्रसक्त एवायमालापः। कदाचिदित एव व्यक्तिर्भविष्यति। तद्विटपान्तरितस्तावच्छृणोमि।

**किङ्करः** -- (सादरं कृताञ्जलिः) कुमार शङ्खचूड, एषः स्वामिन आदेश इति कृत्वेदृशमपि निष्ठुरं मन्त्र्यते।

**शङ्खचूडः** -- भद्र, कथय।

**किङ्करः** -- नागाराजो वासुकिराज्ञापयति।

**शङ्खचूडः** -- (शिरस्यञ्जलिं कृत्वा सादरम्) किं मामाज्ञापयति स्वामी?

**किङ्करः** -- एतद्रक्तांशुकयुगलं परिधायारोह वध्यशिलाम् येन रक्तांशुकचिन्होपलक्षितं गरुडो गृहीत्वाहारकरणाय नेष्यति।

**नायकः** -- (सास्रम्) कष्टम्। असौ वासुकिना परित्यक्तस्तपस्वी।

**किङ्करः** -- शङ्खचूड, गृहाणैतत्। (वस्त्रयुगलमर्पयति)

**शङ्खचूडः** -- (सादरम्) उपनय। (इति गृहीत्वा शिरसि स्वाम्यादेशमर्पयति।)

**वृद्धा** -- (पुत्रहस्ते वाससी दृष्ट्वा सोरस्ताडनम्) हा वत्स, एतत् खलु तद् वध्यचिन्हं वसनं येन विभेति मे हृदयम् (मोहमुपगता।)

**किङ्करः** -- आसन्ना खलु गरुडस्यागमनवेला। तल्लघ्वपक्रामामि। (निष्क्रान्तः।)

**शङ्खचूडः** -- अम्ब, समाश्वसिहि, समाश्वसिहि।

**वृद्धा** -- (समाश्वस्य सास्रम्) हा जात, हा पुत्रक, हा मनोरथशतलब्ध, क्व त्वां पुनः प्रेक्षिष्ये? (कण्ठे गृहीत्वा रोदिति।)

**नायकः** -- (सास्रम्) अहो नैर्धृण्यं गरुत्मतः।

**शङ्खचूडः** -- (अम्बाया अश्रुणि परिमार्जयन्) अम्ब, अलमलं वैक्लव्येन। ननु समाश्वसिहि, समाश्वसिहि।

**वृद्धा** -- (सास्रम्) पुत्रक, कथं समाश्वसिमि? किमेकपुत्र इति कृतानुकम्पेन निवर्तितोऽसि नागराजेन? हा कृतान्तहतक। कथमिदानीं त्वया निर्घृणहृदयेनैवं विस्तीर्णे जीवलोके मम पुत्रक एव स्मृतः? सर्वथा हतास्मि मन्दभागिनी। (मूर्च्छां नाटयति।)



**नायकः** -- **आर्तं कण्ठगतप्राणं परित्यक्तं स्वबान्धवैः।**
**त्राये नैनं यदि ततः कः शरीरेण मे गुणः।। ३।।**

तद् यावदुपसर्पामि।

**शङ्खचूडः** -- अम्ब, संस्तम्भयात्मानम्।

**वृद्धा** -- हा पुत्र शङ्खचूड, दुर्लभः संस्तम्भः। यदैव नागलोकपरिरक्षकेण वासुकिना स्वयं परित्यक्तोऽसि तदा कस्ते परित्राणं करिष्यति?

**नायकः** -- (उपसृत्य) नन्वयमहम्।

**वृद्धा** -- (ससम्भ्रममुत्तरीयेण पुत्रमाच्छाद्य नायकमुपसृत्य) गरुड विनतानन्दन, व्यापादय माम्। अहं ते आहारनिमित्तं परिकल्पिता।

**नायकः** -- (सास्रम्) अहो पुत्रवात्सल्यम्।

**शङ्खचूडः** -- अम्ब, अलमलं त्रासेन। न खल्वयं नागशत्रुः।

**वृद्धा** -- हा पुत्रक, अहं पुनस्तव मरणभीत्या सर्वमेव गरुडमयं पश्यामि।

**नायकः** -- अम्ब, मा भैषीः। नन्वयमहं विद्याधरः, त्वत्सुतसंरक्षणार्थमेवायातः।

**वृद्धा** -- (सहर्षम्) पुत्रक, अहं, पुनः पुनरेव भण।

**नायकः** -- अम्ब, किमनेन पुनः पुनरभिहितेन? कर्मणैव सम्पादयामि।

**वृद्धा** -- (शिरस्यञ्जलिं कृत्वा) पुत्रक, चिरं जीव।

**नायकः** -- **ममैतदम्बार्पय वध्यचिन्हं**
**प्रावृत्य यावद् विनतात्मजाय।**
**पुत्रस्य ते जीवितारक्षणार्थं**
**स्वं देहमाहारयितुं ददामि।।४।।**

**वृद्धा** -- (कर्णौ पिधाय) प्रतिहतं खल्वेतत्। त्वमपि मे शङ्खचूडनिर्विशेषः पुत्रक एव। अथवा शङ्खचूडादधिकतरः य एवं बन्धुजनपरित्यक्तं मम पुत्रकं शरीरप्रदानेन रक्षितुमिच्छसि।

**शङ्खचूडः** -- (सस्मितम्) अहो जगद्विपरीतमस्य महासत्वस्य चरितम्। (नायकमुद्दिश्य) भो महात्मन्। दर्शिता त्वयमात्मप्रदानाध्यवसायान्निर्व्याजा मयि दयालुता। तदलमनेन निर्बन्धेन कुतः--

**जायन्ते च म्रियन्ते च मादृशाः क्षुद्रजन्तवः।**
**परार्थे वद्धकक्षाणां त्वादृशामुद्भवः कुतः।।५**

तत् किमनेन? मुच्यतामयमध्यवसायः।

**नायकः** -- (शङ्खचूडं हस्ते गृहोत्वा) कुमार शङ्खचूड, न मे चिराल्लब्धावसरस्य परार्थसम्पादनमनोरथस्यान्तरायं कर्तुमर्हति भवान्। (पादयोः पतित्वा) तदलं विकल्पेन। दीयतां वध्यचिह्नम्।

**शङ्खचूडः** -- भो महासत्त्व, किमनेन वृथाप्रयासेन? न खलु शङ्खचूडः शङ्खधवलं शङ्खपालकुलं मलिनीकरिष्यति। अथ ते वयमनुकम्पनीयाः, तदियमस्मद्विपत्तिविक्लवा यथा न परित्यजति जीवितमम्बा, तथाभ्युपायश्चिन्त्यताम्।

**नायकः** -- किमत्र चिन्त्यते? चिन्तित एवाभ्युपायः। स तु त्वदायत्तः।



**शङ्खचूडः** -- कथमिव?

**नायकः** -- **म्रियते म्रियमाणे या त्वयि जीवति जीवति।**

**तां यदीच्छसि जीवन्तौ रक्षात्मानं ममासुभिः।।६**

अयमभ्युपायः। तदर्पय त्वरितं वध्यचिह्नम्।

यावदनेनात्मानमाच्छाद्य वध्यशिलामारोहामि। त्वमपि जननीं पुरस्कृत्यास्माद्देशान्निवर्तस्व कदाचिदियमालोक्यैव सन्निकृष्टमाधातस्थानं स्त्री- सहभुवा कातरत्वेनाम्बा प्राणाञ्च त्यह्यात्। किं न पश्यति भवान् इदं विपन्नपन्नगानेककङ्कालसङ्कुलं महाश्मशानम्?

**शङ्खचूडः** -- कथं न पश्यामि? गच्छ त्वम्। किमेभिस्त्रासनोपायैः? (मातुरग्रतो जानुभ्यां स्थित्वा शिरोनिहिताञ्जलिः) अम्ब, त्वमपि निवर्तस्वेदानीम्।

**समुत्पत्स्यामहे मातर्यस्यां यस्यां गतौ वयम्।**

**तस्यां तस्यां प्रियसुते माता भूयास्त्वमेव नः।।७**

(पादयोः पतति)

**वृद्धा** -- (सास्रम् आत्मगतम्) कथं पश्चिममस्य वचनम्। (प्रकाशम्) पुत्रक, त्वामुज्झित्वान्यत्र मे पादौ प्रसरतः। तत् त्वया सह गमिष्यामि।

**शङ्खचूडः** -- (उत्थाय) यावदहमपि नातिदूरे भगवन्तं दक्षिणगोकर्णं प्रदक्षिणीकृत्य स्वाम्यादेशमनुतिष्ठामि। (उभौ निष्क्रान्तौ।)

**नायकः** -- कष्टम्। न सम्यगभिलषितम्। तत् कोऽत्राभ्युपायः?

**काञ्चुकीयः** -- (सहसा प्रविश्य) इदं वासोयुगलं---

**नायकः** -- (दृष्ट्वा सहर्षमात्मगतम्) दिष्ट्या सिद्धमभिवाञ्छितम् अनेनातर्कितोपनतेन रक्तांशुकयुगलेन।

**काञ्चुकीयः** -- इदं वासोयुगलं देव्या मित्रावसुजनन्या कुमाराय प्रेषितम्। परिधत्तां कुमारः।

**नायकः** -- उपनय।

(काञ्चुकीय उपनयति।)

**नायकः** -- (गृहीत्वा आत्मगतम्) सफलीभूतो मे मलयवत्याः पाणिग्रहणविधिः। (परिधाय प्रकाशम्) कञ्चुकिन् गम्यताम्।

मद्वचनादभिवादनीया देवी।

**काञ्चुकीयः** -- यदाज्ञापयति कुमारः। (निष्क्रान्तः।)

**नायकः** -- (दिशोऽवलोक्य) यथायं चलितमलयाचलशिलासञ्चयः प्रचण्डो नभस्वांस्तथा तर्कयामि आसन्नीभूतः पक्षिराज इति। तद् यावदसौ नागच्छत्येव, तावत् त्वरितमिमां वध्यशिलामारोहामि। (तथा कृत्वोपविश्य) अयमागत एवं गरुत्मान्! यावदात्मानमाच्छाद्य तिष्ठामि। (तथा करोति)

(ततः प्रविशति गरुडः। अभिपत्य नायकं गृह्णाति। नेपथ्यात् पुष्पाणि पतन्ति, दुन्दुभिध्वनिश्च।)

l l l l



# NAGANANDA

# नागानन्दे

## शरीरं क्षणविध्वंसि कल्पान्तस्थायिनो गुणाः

---

## Introduction :

The author of the drama Nagananda is Harshavarddhana who was the son of Prabhakaravarddhana and Yasomati. He bore the titles Pratapasila and Siladitya. He was the king of Sthanvisvara and Kanyakubja. King Harsha was a great poet and well versed in Sanskrit. His court was adorned with many learned men. Bana, Divakara and Mayura were the poets of his court and in Harshacharita Bana describes the life and greatness of king Harsha who was his patron king. Harsha was the author ot three plays, viz. Priyadarsika, Nagananda and Ratnavali.

Nagananda is a play of five acts and describe the story exactuly as related in the Kathasaritsagara (Taranga XXII) of Somadeva.

## Summary

"Jimutavahana, a prince of the Vidyadharas, being swayed by sentiments of universal love, relinquishes his

kingdom to serve his parents in the forest. There, in the Malaya mountain, he fells in love with the daughter of the Gandharva king; and roaming about by chance, fresh from the wedding, he hears that the king of serpents has made peace with Garuda and has stipulated to of fer a serpent each day to the king. The heart of the prince is moved. He resolved to save the life of that day's victim even at the risk of his own life. Garuda finds out that by mistake he has harmed the disguised prince and being overpowered with grief learns that disguiised prince and being overpowered with grief learns that abstinence from cruelty is the highest virtue on earth. The play ends with the appearance of the goddess Gauri, who revives the prince. A heavenly shower of nectar brings the serpents already killed by Garuda back to life.

# Notes :

प्रालेयाचलशिखरश्रियम्- प्रालेयस्य अचलः (६ष्ठी तत्) तस्य शिखरः (६ष्ठी तत्), तस्य श्रीः (६ष्ठी तत्), तम् the splendour of the peak of the mountain of snow, i.e., Himalaya.

उद्वहन्ति- उत् + वह् + लट् अन्ति; धारयन्ती; assumes

संघातमृत्यवः- संघातेन मृत्यवः, सुप्सुपा; deaths of multitudes; mass deaths.

स्वपक्षपवनापास्तसागरजलः- स्वस्य पक्षौ, (६ष्ठी तत्), तयोः पवनः (६ष्ठी तत्), सागरस्य जलम् (६ष्ठी तत्), स्वपक्षपवनेन अपास्तं सागरजलं येन (बहुव्री), सः; one who drove away the water of the ocean by the wind of his wings.



अपास्त- अप + अस् (to throw, to drive away) + क्त।

उद्धृत्य- उत् + हृ + ल्यप्; lifting up.

वैनतेयः विनतायाः अपत्यं पुमान् इति विनता + ढक्। Vinata is the name of Garuda's mother. She is the wife of the sage Kashyapa. Kashyapa has another wife Kadru by name. Once there arose a dispute between Kadru and Binata about the colour of the tail of उच्चैःश्रवा, a divine horse. All the serpents were Kadru's sons. With their help Kadru managed to aim the bet. Vinata was made her slave. This was the reason of Garuda's enmity towards the serpents.

एकैकम्- एकः एकः अस्मिन् एकैकः (cf सू- एकं बहुव्रीहिवत्)।

भुजङ्गमान्- भुजं (वक्रं) गच्छति इति भुज + गम् + खच् + २या बहुवः- of the serpents.

प्रतिपन्नम्- प्रति + पद् + क्त; accepted, agree to.

पन्नगाः- पद्भ्यां न गच्छन्तीति पद् + न + गम् + ड; serpents.

अहिद्विषः- अपादाने ५मी, अहीन् (सर्पान्) द्वेष्टि इति अहि + द्विष् + क्विप् ५मी १वः, from the enemy of serpents. (This is a epithet of Garuda).

अनवसाना- अविद्यमानम् अवसानम् यस्याः (बहुब्रीहि), सा, विण to विपत्तिः, having no end.

अवसानम्- अव + सी + ल्युट्; end, stopping.

फणभृतः- कृद्योगे कर्मणि ६ष्ठी (cf सू- कर्तृकर्मणोः कृतिः); फणां विभर्ति इति फण + भृ + क्विप् + ६ष्ठी १वः।

बहुप्रत्यवाये- बहवः प्रत्यवायाः (विघ्नाः) यस्मिन् (बहुव्री), तस्मिन्।

सुतराम्- सु + तरप् + आम् (cf सू- किमेत्तिङ्व्ययधादाम्बद्रव्यप्रकर्षे ६-४-११); आधिक्येन।

अदृष्टसूर्यसुकुमारम्- न दृष्टः (नञ् तत्) अदृष्टः, अदृष्टः सूर्यः येन (बहुव्री); अदृष्टसूर्यः च असौ सुकुमारः च (विशेषेण कर्मधा) तम्; which has not been seen the sun and which is delicate.

Sl. 2 क्रोडीकरोति- अक्रोडं क्रोडं करोति इति क्रोड + अभूततद्भावे च्वि + कृ लट् ति; claps to the bosom.

धात्रीव अनित्यता जातं क्रोड़ीकरोति- A child as soon as it is born is taken care of by the nurse. The mother receives it later. अनित्यता or short-lived nature is compared to a nurse. The purport is that uncertainty about the life of a man overtakes him as soon as he is born.

वध्यशिला- बध्यार्थं शिला (शाकपार्थिवादि); or वध्यस्य शिला (६ष्ठी तत्)।

प्रसक्तः- प्र + सन्ज् + क्त + पुं १मा १ वः, विण. आलापः ; incessant, continuous.

नैर्घृण्यम्- निर् (नास्ति) घृणा (दया) यस्य (बहुव्री निर्घृणः- निर्घृण + ष्यण् (भावे) नैर्घृण्यम्; cruelty.

कृतान्तहतक- सम्बोधने १मा सुलोपः ; हतकः कृतान्तः कृतान्तहतकः (कर्मधा); आहिताग्न्यादित्वात् कृतान्तपदस्य पूर्वनिपातः ; हत एव इति हत + क (स्वार्थे) ; कृतः अन्तः येन (बहुव्री) कृतान्तः; कृतान्त is the god of death ; हतक means 'accursed'.

मा भैषीः- भी लुङ् स- अभैषीः The augment अ is dropped by the rule 'न माङ्योगे'।

शंखचूडनिर्विशेषः- नास्ति विशेषः यस्मात् निर्विशेषः (बहुव्री); शंखचूडात् निर्विशेषः, शंखचूडनिर्विशेषः (सुप्सुपा); not different from Shankhachuda.

आत्मप्रदानाध्यवसायात्- हेतौ ५मी, आत्मनः प्रदानम् (६ष्ठी तत्), तस्य अध्यवसायः (६ष्ठी तत्); determination to sacrifice your own self. अध्यवसायः- अधि-अव + सी + घञ्।



निर्बन्धेन- गम्यमानसाधनक्रियायाः करणे ३या; निर् + बन्ध् + घञ् = निर्बन्धः ; pressing request; importunity.

बद्धकक्षाणाम्- विण. to तादृशाम्; बद्धा कक्षा यैः (बहुव्री) तेषाम्, कृद्योगे कर्तरि ६ष्ठी ; बद्धपरिकराणाम्, of those who have girt their loins.

स्त्रीसहभुवा- विण. to कातरत्वेन ; सह भवति इति सह + भू + क्विप् (उपपद तत्) ; स्त्रियाः सहभूः (६ष्ठी तत्), तेन ; by that which is innate in woman.

विपन्नपन्नगानेककङ्कालसंकुलम्- विण to महाश्मशानम्; विपन्नाः पन्नगाः (कर्मधा), अनेकाः कङ्कालाः (कर्मधा) ; विपन्नपन्नगानाम् अनेककङ्कालाः (६ष्ठी तत्), तैः संकुलम् (३या तत्) ; full of numerous skeletons of dead serpents.

पश्चिमम्- विण to वचनम् ; last.

दक्षिणगोकर्णम्- It is a place of pilgrimage in southern India, where ज्योतिर्लिङ्ग of Siva lies installed. cf. Raghu VIII 33.

'अथ रोधसि दक्षिणोदधेः स्थितोगोकर्णनिकेतमीश्वरम्।
उपवीणयितुं ययौ रतेरुदयावृत्तिपथेन नारदः॥'

चलितमलयाचलशिलासञ्चयः- विण to नभस्वान् ; मलयश्च असौ अचलश्च (कर्मधा) ; शिलानां सञ्चयः (कर्मधा) ; मलयाचलस्य शिलासञ्चयः येन (बहुव्री) सः which has shaken the collection of stones of the Malaya mountain.

नभस्वान्- नभस् + मतुप् + पुं १मा १वः।

l l l l

२

# असमराज्ये संस्कृत-चर्चा

ड॰ राजेन्द्रनाथ शर्मा

**पठामि संस्कृतं नित्यं वदामि संस्कृतं सदा।**
**ध्यायामि संस्कृतं सम्यग् वन्दे संस्कृतमातरम्॥**

'भारतवर्षस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा।'-- इति प्रसिद्धवचनानुसारं भारतीयासु भाषासु संस्कृतस्य विशिष्टं स्थानं वर्तते। सर्वेषां भारतीयानां भाषा तावत् संस्कृतम्। इयं हि भाषा सर्वासां भाषाणां जननी। समग्रमेव भारतवर्षं संस्कृतस्य क्षेत्रं भवति। अत एव तदन्तरा भारतं कुतो भारतं भवितुमर्हति? संस्कृतं विना भारतीयतां कल्पयितुं न शक्यते। यतो हि भारतस्य प्रसिद्धं वेदादिशास्त्रं संस्कृत-भाषायामेव लिखितमस्ति। वेद-गीतादि-शास्त्रं विना भारतीयता कथम्? तथाहि श्रूयते---

**''विना वेदं विना गीतां विना रामायणीं कथाम्।**
**विना कविं कालिदासं कुत्र स्याद् भारतीयता॥''** इति।

इदं तु संस्कृतमेव यतः सर्वाः भारतीयाः भाषाः विलसन्ति। असमीयाभाषायाः अपि मूलं संस्कृतमेव। संस्कृतं तावन् न केवलं भाषा



तत्तु जीवनमेव भारतीयानाम्। असमीयाभाषायाः सम्यग्ज्ञानलाभार्थं संस्कृतस्य ज्ञानं प्रयोजनीयम्॥ अत एव असमराज्ये संस्कृत-भाषायाः चर्चाविषये निबन्धेऽस्मिन् आलोचनं प्रस्तूयते।

असमराज्ये कस्मात् कालात् संस्कृतस्य अध्ययनादि प्रचलित आसीत् तत्तु सम्यग्भावेन सनिश्चयं वा वक्तुं न शक्यते। सप्तम शतिकायां प्राग्ज्योतिषपुरस्य राज्ञां ताम्रलिपिः अथवा शिलालिपिः प्रमाणयति यत् तस्मिन् काले संस्कृतस्य व्यवहारः असीदेव। मध्ययुगस्य प्रारम्भे (नवम शतिकायाम्) **कालिकापुराणमिति** पुराणं विरचितमासीत्। तस्मात् कालादारभ्य असमराज्ये संस्कृत-भाषायाः चिन्ताचर्चा अभवत्। **षोड़शशतिकायां** कामरूपस्य कोचविहार इति स्थाने (अधुना पश्चिमबङ्गे) **रत्नमाला-व्याकरणनाम्ना** नूतनस्य व्याकरण सम्प्रदायस्योद्भवो जातः। महामहोपाध्यायपुरुषोत्तमविद्यावागीशविरचितं प्रयोगरत्नमालाव्याकरणं तस्य प्रमाणमस्ति।

असमराज्ये संस्कृत-शिक्षणस्य द्वे पद्धती प्रचलिते स्तः। एका प्राचीनपद्धतिर्यस्यां प्रवशिका-मध्यमा-शास्त्र्यादिपरीक्षाणां पाठ्यग्रन्थाः अध्याप्यन्ते। एषा पद्धतिः केवलं संस्कृत-पाठशालासु प्रचलति। अपरा च पद्धतिर्विद्यते नवीना यदनुसारेण संस्कृतस्य अध्ययनं सामान्यविश्वविद्यालयेषु माध्यमिक-शिक्षापरिषत्सु च माद्यमिक-स्नातक-स्नातकोत्तर-कक्षासु छात्रैर्विधीयते। प्राचीनकाले असमराज्ये संस्कृत-पाठशालासु एव संस्कृतस्य अध्ययनमध्यापनञ्च विद्यमाने आस्ताम्। तासु पाठशालासु वेद-काव्य-स्मृति-दर्शन-व्याकरणादीनां शास्त्राणामध्यापनमभवत्। एतेषु शास्त्रेषु प्रथमं व्याकरणमेव अध्यापितमासीत्। व्याकरणस्य सर्वत्र मुख्यत्वात्। उक्तञ्च--

**''शास्त्रेष्वाद्यं व्याकरणम्''** इति। षड्वेदाङ्गेषु अपि प्रधानं व्याकरणमेव। तदुक्तम्- ''मुखं व्याकरणं स्मृतम्।'' इति। षड्विंशत्यधिकोणविंशतिशततमे (१९२६) वर्षे श्रीहट्टनामके स्थाने ''असम-

संस्कृत-वोर्ड'' इति एका समितिः असम-सर्वकारेण निर्मिता। अस्याः समितेः अधीने बहवः पाठशालाः सन्ति यत्र संस्कृतस्य अध्ययनमध्यापनं च इदानीं यावत् चलिते स्तः। एताभ्यः संस्कृत-पाठशालाभ्यः प्राचीन-पद्धतिविशेषेण शिक्षिताः बहवः पण्डिता आसन् ये संस्कृत-विद्वत्सु दिवंगतस्य महामहोपाध्यायस्य धीरेश्चराचार्यस्य नाम प्रथममायाति यः **वृत्तमञ्जरी** इत्याख्यं ग्रन्थं विरचितवान् छन्दोविषयकं इदं पुस्तकम्। छन्दोविषये धीरेश्वराचार्यस्य पाटवमासीदिति सुप्रसिद्धिः। श्रूयते यत् कलिकतानगर्यां कस्याञ्चित् सभायां भुजङ्गप्रयातछन्दसि स स्वकीयं भाषणं दत्तवान् इति। तस्य तादृशी प्रतिज्ञा आसीत्। तथाहि श्रूयते-

**''अमुष्यां सभायां ममैषा प्रतिज्ञा।**
**भुजङ्गप्रयातं विना वाङ् न वाच्या।।''** इति।

एतत् पद्यमपि भुजङ्गप्रयातछन्दसि एव अभिहितमस्ति। आशुकविरिति अस्य अपरा प्रसिद्धिः।

भवदेव भागवती नामधेयः संस्कृतपण्डितोऽपि संस्कृत-भाषायां कतिपयान् ग्रन्थान् विरचितवान्। तत्कृतिषु **जयमतीकाव्यमिति** खण्डकाव्यं सुप्रसिद्धं वर्तते। भवदेवः कविः। मध्ययुगीय असमराज्यस्य ऐतिहासिक-घटनामाश्रित्य **जयमतीकाव्यं** लिखितमस्ति। **श्लोकमाला** इति अपरः पद्यग्रन्थो भवदेवेन विरचितः। अस्यां श्लोकमालायां छन्दोबद्धश्लोकेषु ग्रन्थकारेण विभिन्नविषयाः आलोचिताः। संस्कृते श्लोकरचनायां भवदेवस्य पाटवमासीत्। स्मृति-दर्शन-व्याकरण-शास्त्रेषु निपुणः आसीद् भागवतीमहोदयः।

असमराज्ये संस्कृत-चर्चायां समुल्लेखनीयो विद्वान् अस्ति आचार्य मनोरञ्जन शास्त्री। अशेषशास्त्रनिष्णातः आसीत् आचार्य शास्त्रिमहोदयः। मनोरञ्जन शास्त्रिणः कवित्वप्रतिभान्वितानां कृतीनां वैविध्यं परिलक्ष्यते। तस्य प्रतिभापरिचायकाः ग्रन्थाः यथा-- **केतकीकाव्यम्** (अनुवादकाव्यम्); **पाताकाम्नायः** (शास्त्रकाव्यम्); **उतङ्कभैक्ष्यम्** (दृश्यकाव्यम्);



**प्रकामकामरुपम्** (खण्डकाव्यम्)।

असौ मनोरञ्जन शास्त्रिमहोदयः काव्य-स्मृति-दर्शन-व्याकरणेषु महान् पण्डितः आसीत्। असमराज्ये संस्कृत-चर्चायाः अन्यतमो विद्वान् आसीद् विपिनचन्द्र गोस्वामी। अयमपि असमराज्ये संस्कृत-चर्चायां महतीं भूमिकां सम्पादयति स्म। सरलसंस्कृतभाषायां भाषणदाने अस्य नैपुण्यमासीत्। **''नवमल्लिका''** इति असमीयाकाव्यस्य तेन संस्कृतभाषायामनुवादः कृतः। वेद-काव्य-व्याकरणेषु तस्य पाण्डित्यमासीत्। एवमन्येऽपि बहवः प्राचीन-पण्डिता आसन् ये अध्यापनद्वारा असमे संस्कृत-चर्चां कृतवन्तः। संस्कृतभाषायां तेषां ग्रन्थाद्यविरचितत्वात् विस्तरभयाच्च नामानि नोल्लिख्यन्ते।

आधुनिक शिक्षामाध्यमेन शिक्षितानां संस्कृत-पण्डितानां मध्ये आनन्दराम बरुवा सुप्रसिद्धोऽन्यतमश्च। नानाविधानां ग्रन्थानां विरचनेन सम्पादनेन च संस्कृत-भाषायाः चर्चायां महत् कार्यं साधितमनेनानन्दरामेण। महावीर-चरित-नाटकोपरि **जानकीराम-भाष्यं** तेन लिखितम्। आंगलभाषायामपि संस्कृतविषयकग्रन्थाः तेन विरचिताः। आंगल-संस्कृताभिधानमपि सः लिखितवान्। संस्कृत-भाषा-साहित्यं प्रति तस्यावदानं यथार्थत एव उल्लेखनीयं प्रशंसनीयञ्च। प्राच्य विद्यार्णव कृष्णाकान्त-सन्दिकै अन्यतमः संस्कृत-पण्डितः आसीत्। सोऽपि महान् संस्कृतज्ञः। यद्यपि संस्कृतभाषामाध्यमेन तेन ग्रन्थो न विरचितस्तथापि आंगलभाषायां संस्कृत-ग्रन्थस्य अनुवादः कृतः। कविश्रीहर्ष-विरचित-नैषधचरितकाव्यस्य आंगलभाषानुवादः अतीव सुप्रसिद्धः। तत्र च तेन एका गम्भीरा समालोचनात्मिका भूमिका अपि लिखिता।

ड. योगीराज बसु महोदयोऽपि अन्यतम आसीद् यः संस्कृत-चर्चायां बहु कृतवान्। संस्कृतविषयकान् ग्रन्थान् स लिखितवान्। परन्तु संस्कृत-भाषायां न। तस्य संस्कृते भाषणरीतिः मनोहारिणी आसीत्। अतः परं संस्कृत-चर्चायां पण्डितप्रवरः भगवान् चन्द्र गोस्वामी, आचार्य रजनीकान्त देव शर्मा, अध्यापक विनन्द चन्द्र वर्मन्-महोदया उल्लेखनीया वर्तन्ते।

एवं ड. विश्वनारायण शास्त्री अपि संस्कृत-चर्चायां आधुनिकः पण्डितो वर्तते। संस्कृत-भाषायां विरचितस्तस्य उपन्यासोऽस्ति **अविनाशि** इति। अन्येऽपि बहवो ग्रन्थास्तेन लिखिताः सम्पादिताश्च। संस्कृतभाषायां भाषणदानेऽपि तस्य पाटवमस्ति।

असम-राज्ये संस्कृत-क्षेत्रस्य अन्यतमो महान् पण्डितोऽस्ति ड. मुकुन्द माधव शर्मा। अस्य संस्कृत-भाषायां लिखितो ग्रन्थोऽस्ति **व्यञ्जना-प्रपञ्च-समीक्षा**। संस्कृतविषयका अन्येऽपि ग्रन्थास्तेन अनूदिताः लिखिताः सम्पादिताश्च। श्लोकविरचने अस्य नैपुण्यं वर्तते। संस्कृतभाषायां भाषणनैपुण्यमपि अस्य परिलक्ष्यते।

एवमन्येऽपि केचन आधुनिकाः पण्डिताः सन्ति ये अध्यापनद्वारा असमे संस्कृतस्य चर्चाम् अद्यापि कुर्वन्ति।

अधुनाऽपि असम-राज्यस्य बहुषु माध्यमिक-विद्यालयेषु, महाविद्यालयेषु, विश्वविद्यालयेषु तथा संस्कृत पाठशालासु अध्ययनाध्यापनमाध्यमेन संस्कृतस्य चिन्ता-चर्चा प्रचलिता। स्वमहिम्ना इदं समग्रे भारते चिरं स्थास्यति। तदुक्तम्-

**यावद् भारतवर्षं स्याद् यावद् विन्ध्यहिमाचलौ।**
**"यावद् गंगा च गोदा च तावदेव हि संस्कृतम्।।"**

## Notes :

असम-संस्कृत वोर्ड- The Assam Sanskrit Board was established in 1926 with its office at Srihatta (Sylhet) in undivided Assam. At present, it is at Kahilipara, Guwahati. It has under it 81 Sanskrit Tols where Sanskrit is taught through traditional method. It has



also 5 Pali Tols where Pali is taught. The Board conducts Pravesika, Madhyama and Sastri Examinations.

प्रयोगरत्नमाला-व्याकरण- This is a Sanskrit grammar written by Purusottama Vidyavagisa in the 16th century A.D. under the patronage of king Naranarayana of Koch-bihar in west Bengal. It is a grammar written in metrical form containing about 2300 sutras.

संस्कृत-पाठशाला- Sanskrit Tols numbering 81 in Assam at present under Assam Sanskrit Board, Guwahati.

षड्वेदाङ्ग- Six limbs of the Vedas. They are शिक्षा, कल्प, निरुक्त, व्याकरण, छन्द and ज्योतिष।

धीरेश्वराचार्य- He is a Sanskrit scholar of extra-ordinary fame. He was born in 1851 at Athgharia village in the district of Nalbari. He is the author of the Vrttamanjari, an outstanding metrical composition. He was the Pradhan Adhyapaka in the Damodar Dham Sanskrit Tol at Athgharia.

वृत्तमञ्जरी- It is a work on metre (छन्द) by Dhiresvaracarya. This is his outstanding metrical composition. It contains seven chapters known as stavakas.

भुजङ्गप्रयात- This is a Samavrtta type of metre in which each quarter (पाद) of a verse contains 12 syllables. It is defined as "भुजङ्गप्रयातं चतुर्भिर्यकारैः।"

भवदेव भागवती- He was born in the village Kaithalkuchi in the District of Nalbari in 1902. He was the Sanskrit teacher in the Chamata H.S. School in Nalbari

district. He worte the Sanskrit Poem Jayamati and a work known as Slokamala.

जयमती काव्य- It is a khandakavya in one hundred verses by Bhabadev Bhagavati. The work describes the glorious story of lady martyr Jayamati. The work is written in three cantos called pravaha.

श्लोकमाला- It is an anthology of 228 Sanskrit verses on different topics like Sankaradeva, Mahatma Gandhi and other topics like Syamaparni. Its author is Bhabadev Bhagavati.

मनोरञ्जन शास्त्री- He was born in the village Bherua in Mangaldoi in 1911. A scholar of great repute, he was the principal of the Nalbari Sanskrit College. He was also the Visiting Professor of Sanskrit in the Gauhati University.

He wrote a Sanskrit poetic work called Prakamakamarupa. He translated the Assamese poem Keteki of poet Raghunath Choudhary into Sanskrit. It is named as Ketaki. He also wrote the Sanskrit books known as Patakamnaya and Utankabhaiksyam.

केतकी काव्यम्- It is the Sanskrit translation of Raghunath Choudhary's Assamese poem Keteki. The Sanskrit translation is done by Manoranjan Shastri. The poem is a description of the bird keteki.

पताकाम्नाय- It is a poetic work in 177 verses divided into two parts called purvarddha and uttararddha. Manoranjan Shastri, the author of the book gives



us a philosophical exposition of the Indian Flag. He also adds the National Emblem to the Flag.

उतङ्कभैक्ष्यम्- It is an one-act play by Manoranjan Shastri. Its theme has been taken from the Bhagavatapurana. Utanka is the disciple of the Guru known as Veda.

प्रकामकामरूप- This is a Mahakavya in nine cantos written by Manoranjan Shastri. Written in classical style, the work describes the ancient land Kamarupa which is the home state of the author. It is the best work of the author.

विपिन चन्द्र गोस्वामी- He was born in Nalbari Satra in Nalbari district in 1910. He was the Principal of the Munikulasram Veda Vidyalaya at Panbazar, Guwahati. He was also the lecturer in Sanskrit, Gauhati University. He translated the Navamallika of Raghunath Choudhary into Sanskrit under the same title.

नवमल्लिका- This is a Sanskrit translation of Raghunath Choudhary's poem named Navamallika. Pandit Bipin Chandra Goswami did the Sanskrit rendering of the same.

आनन्दराम बरुवा- He was born in North Guwahati in 1850. He was an outstanding Sanskrit scholar of international repute. He worte many Sanskrit works including his commentary named Janakiramabhasya. Dhatuvrttisara, Dhatukosa and Namalinganusasana are his notable works.

He was the first B. A. and Indian Civil Service holder from Assam.

महावीर-चरितम्- A Sanskrit drama by the great poet Bhavabhuti. It is a drama in seven acts. It is based on the life of Rama and Sita.

जानकीराम-भाष्यम्- This is a commentary written by Anundoram Barooah on the drama Mahavira-Carita of Bhavabhuti. The name of the commentary is given after the name of Anundoram Barooah's elder brother Janakiram Barooah.

कृष्णकान्त-सन्दिकै- He was the first Vice-Chancellor of the Gauhati University. He was a great Sanskrit scholar of international repute. He became the President of the Assam Sahitya Sabha and All India Oriental Conference. He knew several languages. He was born in 1898 at Jorhat.

श्रीहर्ष- He is the author of the great epic called Naisadha-carta, one of the five Mahakavyas. The Naisadha-carita is written in 22 cantos. It describes the story of king Nala and Damayanti. Sri Harsa is a great poet.

ड. योगीराज बसु- He was the Professor and Head of the Deptt. of Sanskrit of the Gauhati University, Guwahati. He was a great scholar of Veda and Vedanta. He was a good speaker of Sanskrit.

भगवान चन्द्र गोस्वामी- He was an Adhyapaka of the Nalbari Sanskrit College, Nalbari. He was also a part time teacher in the Deptt. of Sanskrit, Nalbari College, Nalbari. He translated the Assamese novel Jiya Manuh of Trailokyanath Goswami into Sanskrit under the title Jivitah Manavah.



रजनीकान्त देव शर्मा- He was the Head of the Dept. of Sanskrit, Cotton College, Guwahati. He was also a lecturer in the Deptt. of Assamese, Gauhhati University. He was also a guest lecturer in the Deptt. of Sanskrit of the same University. He was a good orator and a scholar of Sanskrit. He was born at Vyaskuchi in the district of Barpeta.

विनन्द चन्द्र वर्मन- He was the Head of the Deptt. of Sanskrit, Cotton College, Guwahati. Later on, he became the Principal of Diphu Govt. College, Diphu. He was a good Sanskrit Scholar. He was born at Mohkhali in the district of Nalbari.

ड. विश्वनारायण शास्त्री- He belonged to Narayanpur in the district of North Lakhimpur. He was a Sanskrit scholar of international repute. He was the recipient of the India's President's Certificate of Honour and the winner of Sahitya Akademi Award for his historical Sanskrit Novel Avinasi. He was also the Member of Parliament (Lok Sahhbha).

अविनाशि- This is a Sanskrit Historical Novel Written by Dr. Biswanarayan Shastri. This Novel bagged Sahitya Akademi Award.

ड. मुकुन्द माधव शर्मा- He was born at Dibrugarh in 1933. He was the Professor and Head of the Department of

Sanskrit, Gauhati University. He was also the Vice-Chancellor of the Dibrugarh University. He is a renowned Sanskrit scholar in India and abroad. He is the recipient of the President's Certificate of Honour. His Vyanjanaprapanca Samiksa, a Sanskrit work on symbolism has been accepted for the award of the D. Litt. Degree by the Calcutta University in 1970.

**व्यञ्जना-प्रपञ्च-समीक्षा-** This is a work on symbolism written by Professor Mukunda Madhava Sharma. Professor Sharma obtained the degree of D. Litt. of the Calcutta University for this book in 1970.

l l l l



## GUARANTEE CERTIFICATE FROM THE PUBLISHER

Certified that this book is produced as per specification the Memorandum of Agreement (For publication of Text Book Clause No. 6) which states, interalia, that

| | | |
|---|---|---|
| Paper | = | 58 GSM |
| Size | = | 1/16 Double Demy |
| Type | = | 12 pt. D.T.P. |
| Binding | = | Limp Sewn |
| Line per page | = | 30 lines per page |
| Cover page | = | Bi-colour, Laminated, Maplitho Paper of 130 GSM. |

If any of the specification mentioned above, is violated than "otherwise The work order will be cancelled and the security money will be forefeited."

Name of the Publisher
Mani Manik Prakash
Panbazar, Guwahati- 781001